ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय एकाग्निकाण्डः

# (मन्त्र प्रश्नः)

## Version Notes:

**This is now the current Version 0.1 dated May 31, 2021.**

1. This replaces the earlier version 0.0 dated March 20, 2018.

2. This version has been updated with the errors found and reported till May 31, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 20th March 2018 |

**Notes on Ekaagni Kanda Compilation:**

**Source Reference:**

This book is compiled from Ekaagni Kanda book published under the authority of Maharaja of Mysore in 1902 edited by Great Scholar Srinivasa Acharya containing the commentary of Shri Haradatta Mishra printed at Government Branch Press, Mysore.

**Structure of the Book:**

Ekaagni Khanda has two Prapaatakas, first with 18 Khandas and Second with 22 Khandas. A Khanda is a section with specific set of Statements consisting of Mantras. The Source Book gives the number of Statements as well as the number of Mantras in each Khanda. The Mantra Number reference is given at the end of word/padam or statement where the Mantra ends.The Subject title is also given in the Source book. These are given as titles in Index for reference and we have also indicated the end of specific subjects wherever reference is available. Korvai is given for each Khanda indicated as (K1,K2) etc. as reference with the number of statements in that Khanda. If a Khanda has more than 20 Statements, both 10th and 20th Statement will have
a reference as **"( )"**.

A number of short forms of Mantras are given for which the expansion is provided in a Box. **"{ }"** bracket symbol used here to indicate the Mantras which are to be expanded.

Anushangam also is present for few Mantras and are represented immediately after the corresponding Mantra. **" * "** star symbol has been used to indicate the Mantras which are to be chanted in "anushanga" format.

References of Source Mantras have been indicated where a Mantra is expanded. The symbols or notations used are:

**TS - TaittIriya Samhita**
**TB - TaittIriya Braahamanam**
**TA - TaittIriya Aranyakam**
**EAK - Ekaagni Kaandam**
**RV - Rig Veda Samhita**

# Table of Contents

1 कृष्णयजुर्वेदीय एकाग्निकाण्डः – प्रपाठकः 1 .......... 12
1.1 विवाहे वरप्रेष्णाद्यः .......... 14
1.1.1. वरप्रेषणम् .......... 14
1.1.2. स्वयम् दृष्ट्वा जपः .......... 14
1.1.3 समीक्षणम् .......... 14
1.1.4. वध्वा भ्रुवोरन्तरं संसृज्य प्रतीचीनं निरसनम् .......... 15
1.1.5. कन्यानयनकाले बन्धुजनरोदने जपः .......... 15
1.1.6. जलाहरणाय प्रेषणम् .......... 15
1.1.7 वधूशिरसि दर्भेण्वनिधानम् .......... 15
1.1.8 तस्मिन्निण्वे उगच्छिद्रप्रतिष्ठापनम् .......... 15
1.1.9 छिद्रे सुवर्णनिधानं .......... 15
1.2 विवाहे स्नानाद्यः .......... 16
1.2.1 स्नानमन्त्राः .......... 16
1.2.2. अहतस्य वाससः परिधानम् .......... 17
1.2.3. योक्त्रबन्धनम् .......... 17
1.2.4. अग्निमभ्यानयनम् .......... 17
1.3 आज्यभागान्ते अभिमन्त्रणम् .......... 18
1.3.1. आज्यभागान्ते अभिमन्त्रणम् .......... 18
1.3.2. पाणिग्रहणमन्त्राः .......... 18
1.3.3 सप्तपदाभिप्रक्रमणम् .......... 19
1.4 विवाहे प्रधानाहुतिमन्त्राः .......... 20
1.4.1 प्रधानाहुतिमन्त्राः .......... 20
1.5 अश्मास्थापनाद्यः .......... 23
1.5.1. अश्मास्थापनम् .......... 23
1.5.2. लाजहोमप्रदक्षिणादि. .......... 23

1.5.3. योक्त्रविमोचनम्......................................................25
1.5.4 अनुगतस्यौपासनाग्नेः समाधान मन्त्राः ..........................25
1.6 विवाहे प्रयाणकाले स्थस्योत्तम्भनी........................................26
1.6.1. प्रयाणकाले स्थस्योत्तम्भनी ..........................................26
1.6.3. आरोहणकालेऽभिमन्त्रणम्...............................................26
1.6.4. वर्त्मनोस्सूत्रस्तरणम्.....................................................27
1.6.5 ततुपरि गमनं ..............................................................27
1.7 विवाहे तीर्थादिव्यतिक्रमजपाद्यः .........................................28
1.7.1. तीर्थादिव्यतिक्रमे जपः...................................................28
1.7.2. नावोऽनुमन्त्रणम् .........................................................28
1.7.3. तीर्त्वा जपः .................................................................28
1.7.4. श्मशानादिव्यतिक्रमे होमः ............................................29
1.7.5. क्षीरिवृक्षाद्यतिक्रमे जपः.................................................30
1.7.6. नद्याद्यतिक्रमे जपः........................................................30
1.7.7. वद्ध्वै गृहप्रदर्शनम्.........................................................31
1.7.8. वाहयोविमोकः...............................................................31
1.8 विवाहे चर्मास्तरणाद्यः.........................................................31
1.8.1. चर्मास्तरणम्..................................................................31
1.8.2. गृहप्रवेशे वाचनम्...........................................................31
1.8.3 प्रविश्य होमः.................................................................32
1.9 विवाहे चर्मोपवेशनाद्यः ...................................................... 34
1.9.1. चर्मोपवेशनं.................................................................. 34
1.9.2. षालकाय फलदानम्........................................................ 34
1.9.3. गृहप्रवेशे जपः............................................................... 34
1.9.4. ध्रुवारुन्धाति दर्शनम्....................................................... 34
1.9.5 उपकारणसमापनयोः काण्डर्षीणामनन्तरं होमः .....................35
1.9.6. स्वयम् प्रज्वलितेऽग्नौ समिदाधानम् ...................................35

1.10 विवाहे दाण्डोत्थापन मन्त्राद्यः.......................................................36
1.10.1. दाण्डोत्थापन मन्त्रौ .......................................................36
1.10.2 चतुर्थी होमः .......................................................36
1.11 विवाहे वधवरयोरन्योन्य समीक्षणाद्यः.......................................................38
1.11.1. वधवरयोरन्योन्यं समीक्षणं .......................................................38
1.11.2. आज्यशेषेण हृदयदेशे समञ्जनम् .......................................................38
1.11.3 समञ्जने जपः .......................................................39
1.12 विवाहे समावेशन जपः .......................................................39
1.12.1.समावेशनकाले जपः.......................................................39
1.13 गर्भधाने ऋतुसमावेशः....................................................... 40
1.13.1.ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं ....................................... 40
1.14 ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं....................................... 42
1.14.1.ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं ....................................... 42
1.14.2. अर्थप्राध्वस्य परिक्षवपरिकासने जपः ....................................... 43
1.14.3 चित्रियस्य वनस्पतेरभिमन्त्रणम्....................................... 43
1.14.4 शकृद्रितेरुपस्थानम्....................................... 43
1.14.5. सिग्वातस्याभिमन्त्रणम्....................................... 43
1.14.6. शकुनेरभिमन्त्रणम्....................................... 44
1.15 दम्पत्योर्–हृदयविश्लेषे हृदय–संसर्गेफ्सोर्–होमः ....................................... 44
1.15.1 दम्पत्योर्–हृदयविश्लेषे हृदय–संसर्गेफ्सोर्–होमः....................................... 44
1.16 पत्युर्वशीकरणं कर्म....................................... 45
1.16.1. पत्युर्वशीकरणं कर्म ....................................... 45
1.17 सपत्नीबाधनं कर्म....................................... 47
1.17.1. सपत्नीबाधनं कर्म ....................................... 47
1.18 वध्वाः यक्ष्मादिहरं कर्म....................................... 48
1.18.1 वध्वाः यक्ष्मादिहरं कर्म....................................... 48

2 कृष्णयजुर्वेदीय एकाग्निकाण्डः – द्वितीयः प्रपाठकः....................................52
2.1 उपनयनमन्त्राः....................................................................52
2.1.1 क्षुर कर्म.........................................................................52
2.2 उपनयनमन्त्राः....................................................................53
2.2.1.समिदाधानम्.....................................................................53
2.2.2. अश्मास्तापनम्.................................................................53
2.2.3. वासः परिधानम्................................................................53
2.2.4. मौञ्ज्यजनि मन्त्राः ...........................................................55
2.3 उपनयनमन्त्राः....................................................................56
2.3.1. अग्रेरुत्तरतोऽवस्थापनम् प्रोक्षणम् हस्तग्रहणम् परिदानम् उपनयनम् कर्ण जपः प्रश्न–प्रतिवचनं च........................................................................56
2.4 उपनयनमन्त्राः....................................................................58
2.4.1.होम मन्त्राः......................................................................58
2.4.2. कूर्चारोहणम्...................................................................59
2.4.3. सावित्री..........................................................................59
2.4.4. ओष्टकर्णोपस्पर्.शनं .......................................................... 60
2.5 उपनयनमन्त्राः....................................................................61
2.5.1. दण्डादानम्.....................................................................61
2.5.2. कुमारवाचनम् उत्थापनम् आदित्योपस्थानम्..........................61
हस्तग्रहणम् च. ......................................................................61
2.6 उपनयनमन्त्राः....................................................................63
2.6.1 समिदाधानं ......................................................................63
2.6.2 संशासनं वासस आदानं च. ................................................ 64
2.7 समावर्तनमन्त्राः.................................................................65
2.7.1. समिधादानं......................................................................65
2.7.2. क्षुर कर्म .........................................................................65
2.7.3. मेखलाया उपजूहनं............................................................67

2.7.4. स्नान मन्त्राः ........67
2.7.5. दन्तधावमम् वासः परिधानम् च. ........ 68
2.7.6. देवताभ्यश्चन्दनप्रदानं. ........ 69
2.7.7.आत्मनोऽनुलेपः ........ 69
2.7.8. उदपात्रे सौवर्णमणिपरिप्लावनम् ........ 69
2.7.9. ग्रीवास्वाबन्धनम् ........ 69
2.7.10. वाससः परिधानम् ........70
2.8 समावर्तनमन्त्राः ........ 71
2.8.1. होमः ........ 71
2.8.2. स्रग्बन्धनं ........72
2.8.3. आञ्जनमन्त्रः ........72
2.9 समावर्तनमन्त्राः ........73
2.9.1. आञ्जनमन्त्रः ........73
2.9.2. अदर्शवेक्षण उपानद्ग्रहण दण्डादान् दिगुपस्थान नक्षत्रचन्द्रोपस्थानानि..73
2.9.3. मधुपर्कमन्त्राः ........75
2.10 मधुपर्क मन्त्राः ........76
2.10.1. मधुपर्क मन्त्राः ........76
2.11 सीमन्तोन्नयनं ........78
2.11.1. होममन्त्राः ........78
2.11.2 वीणागानमन्त्रौ ........ 80
2.11.3 पुंसवनं ........ 80
2.11.4 क्षिप्रं सवनं ........ 80
2.11.5 जरायुणाऽवाक्पतने यजुर्भ्यामवोक्षणं ........ 81
जातकर्म 2.11.6 full, 2.12 full , 2.13 part ........ 81
2.12 जातकर्म ........83
2.12.1 मूधन्यवघ्रानम् ........ 84

2.12.2 दक्षिणे कर्णे जपः .................... 84
2.12.3 प्राशनमन्त्राः .................... 84
2.12.4 स्नापनमन्त्राः .................... 84
2.12.5 पृषदाज्य प्राशनम् .................... 85
2.13 जातकर्म .................... 85
2.13.1 मातुरङ्के कुमारमादधाति .................... 85
2.13.2 स्तनं धापयति .................... 86
2.13.3 पृथिव्यभिमर्शनं .................... 86
2.13.4 कुमाराभिमर्शनं .................... 86
2.13.5 शिरस्त उद्कुम्भनिधानं .................... 86
2.13.6 फलीकरणमिश्रसर्षपहोमः .................... 86
2.14 जातकर्म .................... 88
2.14.1 फलीकरणमिश्रसर्षपहोमः .................... 88
2.14.2 पुत्रस्याभिमन्त्रणं .................... 88
2.14.3 मूर्धन्यवध्राणं .................... 89
2.14.4 दक्षिणे कर्णे जपः .................... 89
2.14.5 कुमार्या अभिमन्त्रणम् .................... 90
2.14.6 अन्नप्राशन मन्त्राः .................... 90
2.14.7 चौळ मन्त्राः .................... 91
2.15 गृहनिर्माण प्रवेशौ .................... 91
2.15.1 गृहनिर्माणप्रवेशौ .................... 91
2.16 स्वग्रगृहीतस्याभिमन्त्रणम् .................... 94
2.16.1 स्वग्रगृहीतस्याभिमन्त्रणम् .................... 95
2.16.2 शङ्ख्ग्रहगृहीतस्याभि–मन्त्रणम् .................... 96
2.16.3 सर्पबलिः .................... 97
2.17 सर्पबलिः .................... 97
2.17.1 सर्पबलिः .................... 97

2.18 आग्रयणाद्यः ....................................................................................103
2.18.1. आग्रयणं ..................................................................................103
2.18.2 हेमन्तप्रत्यवरोहणं. .....................................................................103
2.18.3 ईशान बलिः ...............................................................................104
2.19 मासिश्राद्धं ........................................................................................107
2.19.1 मासिश्राद्धं.................................................................................108
2.20 मासिश्राद्धं ........................................................................................111
2.20.1 मासिश्राद्धं ...............................................................................111
2.20.2 अष्टका................................................................................... 112
2.21 अष्टकाद्यः .......................................................................................114
2.21.1 अष्टका ..................................................................................114
2.21.2 सनिमित्वा जपः........................................................................ 115
2.21.3 रथादिलाभे स्वीकारः ................................................................ 116
2.21.4 सँवादमेध्यतः कर्म .................................................................. 117
2.22 विविधकर्माणि ................................................................................ 117
2.22.1. क्रोधापनयनार्थं कर्म ................................................................ 117
2.22.2. असम्भवेप्सोः कर्म................................................................... 118
2.22.3. पुण्यव्यवहारसिद्ध्यर्थं कर्म......................................................... 118
2.22.4. स्नेहाविच्चेदार्थं कर्म ................................................................. 118
2.22.5 पलायितदासुदीनां पुनरागमनफलं कर्म......................................... 118
2.22.6 देहे फलदिपतने प्रक्षालनं.......................................................... 119
2.22.7 आगारस्थूणाविरोहणादीषु होमः.....................................................120
2.22.8 अमात्यानामाभिमुख्येन निधने परिधिनिधानम्. ................................ 121

========================

## Notes on Ekaagni Kanda Compilation:

### Source Reference:

This book is compiled from Ekaagni Kanda book published under the authority of Maharaja of Mysore in 1902 edited by Great Scholar Srinivasa Acharya containing the commentary of Shri Haradatta Mishra printed at Government Branch Press, Mysore.

### Structure of the Book:

Ekaagni Khanda has two Prapaatakas, first with 18 Khandas and Second with 22 Khandas. A Khanda is a section with specific set of Statements consisting of Mantras. The Source Book gives the number of Statements as well as the number of Mantras in each Khanda. The Mantra Number reference is given at the end of word/padam or statement where the Mantra ends.The Subject title is also given in the Source book. These are given as titles in Index for reference and we have also indicated the end of specific subjects wherever reference is available. Korvai is given for each Khanda indicated as (K1,K2) etc. as reference with the number of statements in that Khanda. If a Khanda has more than 20 Statements, both 10th and 20th Statement will have
a reference as **"( )"**.

A number of short forms of Mantras are given for which the expansion is provided in a Box. **"{ }"** bracket symbol used here to indicate the Mantras which are to be expanded.

Anushangam also is present for few Mantras and are represented immediately after the corresponding Mantra. **" * "** star symbol has been used to indicate the Mantras which are to be chanted in "anushanga" format.
References of Source Mantras have been indicated where a Mantra is expanded. The symbols or notations used are:

**TS - TaittIriya Samhita**
**TB - TaittIriya Braahamanam**
**TA - TaittIriya Aranyakam**
**EAK - Ekaagni Kaandam**
**RV - Rig Veda Samhita**

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## 1 कृष्णयजुर्वेदीय एकाग्निकाण्डः – प्रपाठकः 1

### एकाग्निकाण्डः प्रारम्भः

अदितेऽनु मन्यस्व । अनुमतेऽनु मन्यस्व । सरस्वतेऽनु मन्यस्व ।
देव सवितः प्रसुव ॥

ओं अग्नये स्वाहा । सोमाय स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा ।
ध्रुवाय भूमाय स्वाहा । ध्रुवक्षितये स्वाहा ।
अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा ॥

अदितेऽन्वमꣳस्थाः । अनुमतेऽन्वमꣳस्थाः । सरस्वतेऽन्वमꣳस्थाः ।
देव सवितः प्रासावीः ॥

धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यः स्वाहा ।
ओषधिवनस्पतिभ्यः स्वाहा । रक्षोदेवजनेभ्यः स्वाहा ।
गृह्याभ्यः स्वाहा । अवसानेभ्यः स्वाहा । अवसानपतिभ्यः स्वाहा ।

सर्वभूतेभ्यः स्वाहा । कामाय स्वाहा । अन्तरिक्षाय स्वाहा ।
यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा ।
पृथिव्यै स्वाहा । अन्तरिक्षाय स्वाहा । दिवे स्वाहा । सूर्याय स्वाहा ।
चन्द्रमसे स्वाहा । नक्षत्रेभ्यः स्वाहा । इन्द्राय स्वाहा । बृहस्पतये
स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा । स्वधा पितृभ्यः स्वाहा ।
नमो रुद्राय पशुपतये स्वाहा । ये भूताः प्रचरन्ति दिवा नक्तं
बलि-मिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि
मयि पुष्टिं पुष्टिपतिर् दधातु स्वाहा ॥

==================

## विवाहमन्त्राः (1.1 – 1.12)

### 1.1 विवाहे वरप्रेष्णाद्यः

#### 1.1.1. वरप्रेषणम्

हरिः ओं ।

प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिर्वरा९ अभि षु प्रसीदत ।

अस्माकमिन्द्र उभयं जुजोषति यथ्सौम्यस्यान्धसो बुबोधति ॥ 1

अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।

समर्यमा सं भगो नो निनीयाथ् सं जास्पत्य९ सुयममस्तु देवाः ॥ 2

#### 1.1.2. स्वयम् दृष्ट्वा जपः

अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।

इन्द्रापुत्रघ्नीं ँलक्ष्म्यं तामस्यै सवितः सुव ॥ 3

#### 1.1.3 समीक्षणम्

अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यः सुमनाः सुवर्चाः ।

जीवसूर्देवकामा स्योना शन्नो भव द्विपदे शञ्चतुष्पदे ॥ 4

**1.1.4. वध्वा भ्रुवोरन्तरं संसृज्य प्रतीचीनं निरसनम्**

इदमहं ँया त्वयि पतिघ्न्यलक्ष्मिस्तां निर्दिशामि ॥ 5

**1.1.5. कन्यानयनकाले बन्धुजनरोदने जपः**

जीवा७ रुदन्ति विमयन्ते अद्ध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ( ) ।

वामं पितृभ्यो य इद७ समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥ 6

**1.1.6. जलाहरणाय प्रेषणम्**

व्युक्षत् क्रूरमुदचन्त्वाप आऽस्यै ब्राह्मणाः स्नपन७ हरन्तु ।

अवीरघ्नीरुदचन्त्वापः ॥ 7

**1.1.7 वधूशिरसि दर्भेण्वनिधानम्**

अर्यम्णो अग्निं परि यन्तु क्षिप्रं प्रतीक्षन्ता७ श्वश्र्वो देवराश्च ॥ 8

**1.1.8 तस्मिन्निण्वे उगच्छिद्रप्रतिष्ठापनम्**

खेऽनसः खे रथः खे युगस्य शचीपते । अपालामिन्द्र त्रिः

पूर्त्–व्यकरथ् सूर्यवर्चसम् ॥ 9

**1.1.9 छिद्रे सुवर्णनिधानं**

शन्ते हिरण्य७ शमु सन्त्वापः शन्ते मेधी भवतु शं ँयुगस्य तृद्म ।

शन्त आपः शतपवित्रा भवन्त्वथा पत्या तन्व७ स७ सृजस्व ॥ 10

**(दीधियुर्नरोऽष्टौ च)** (K1) (18)

## 1.2 विवाहे स्नानाद्यः

### 1.2.1 स्नानमन्त्राः

हिरण्यवर्णाः शुचयः पावकाः प्रचक्रमुर्. हित्वाऽवद्यमापः ।
शतं पवित्रा वितता ह्यासु ताभिष्ट्वा देवः सविता पुनातु ॥ 1

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्वग्निः ।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शꣳ स्योना भवन्तु ॥ 2

यासाꣳ राजा वरुणो याति मद्ध्ये सत्यानृते अवपश्यन् जनानाम् ।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शꣳ
स्योना भवन्तु ( ) ॥ 3

यासां देवा दिवि कृण्वन्ति भक्षँया अन्तरिक्षे बहुधा निविष्टाः ।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शꣳ स्योना भवन्तु ॥ 4

शिवेन त्वा चक्षुषा पश्यन्त्वापः शिवया तन्वोपस्पृशन्तु त्वचं ते ।
घृतश्चुतः शुचयो याः पावकास्तास्त आपश्शꣳ स्योना भवन्तु ( ) ॥ 5

**1.2.2. अहतस्य वाससः परिधानम्**

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।

वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ 6

**1.2.3. योक्त्रबन्धनम्**

आशासानेत्येषा { } ॥ 7

**Expansion for - आशासानेत्येषा**

आशासाना सौमनसं प्रजाꣳ सौभाग्यं तनूं ।

अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कं । (**Ref TS 1.1.10.1**)

**1.2.4. अग्निमभ्यानयनम्**

पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहताꣳ रथेन ।

गृहान् गच्छ गृहपत्नी यथाऽसो वशिनी त्वं ँविदथमावदासि ॥ 8

*(भवन्तु – पञ्च च) (K2) (15)*

----------------------------------------------------------------------

## 1.3 आज्यभागान्ते अभिमन्त्रणम्

### 1.3.1. आज्यभागान्ते अभिमन्त्रणम्

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।

तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ 1

सोमो ऽददद् गन्धर्वाय गन्धर्वो ऽदददग्नये ।

रयिं च पुत्रा॑श्चादादग्निर् मह्यमथो इमाम् ॥ 2

### 1.3.2. पाणिग्रहणमन्त्राः

गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर् यथाऽसः ।

भगो अर्यमा सविता पुरन्धिर् मह्यं त्वाऽदुर्गार्.हपत्याय देवाः ॥ 3

ते ह पूर्वे जनासो यत्र पूर्ववहो हिताः ।

मूर्द्धन्वान्. यत्र सौभ्रवः पूर्वो देवेभ्य आऽतपत् ॥ 4

सरस्वति प्रेदमव सुभगे वाजिनीवति ।

तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः ( ) ॥ 5

य एति प्रदिशः सर्वा दिशोऽनु पवमानः ।

हिरण्यहस्त ऐरंमः स त्वा मन्मनसं कृणोतु ॥ 6

## 1.3.3 सप्तपदाभिप्रक्रमणम्

एकमिषे विष्णुस्त्वाऽन्वेतु 7,

द्वे ऊर्जे 8*, त्रीणि व्रताय 9*, चत्वारि मायोभवाय 10*,

पञ्च पशुभ्यः 11*, षड् ऋतुभ्यः 12*,

सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु ॥ 13

**अनुषङ्गः – form 8 to 12**

द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु । 8

त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु । 9

चत्वारि मायोभवाय विष्णुस्त्वाऽन्वेतु । 10

पञ्च पशुभ्यः विष्णुस्त्वाऽन्वेतु । 11

षड् ऋतुभ्यः विष्णुस्त्वाऽन्वेतु । 12

सखा सप्तपदा भव सखायौ सप्तपदा बभूव सख्यं ते गमेयꣳ सख्यात् ते मा योषꣳ सख्यान् मे मा योष्ठाः समयाव सङ्कल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि सम्ँवसानौ सन्नौ मनाꣳसि सं ँव्रता समु चित्तान्याकरम् । 13

सा त्वमस्यमूह–ममूहमस्मि सा त्वं द्यौरहं पृथिवी त्व९ं रेतोऽह९ं
रेतोभृत्त्वं मनोऽहमस्मि वाक् त्व९ं सामाहमस्म्यृक्त्व९ं सा मामनुव्रता
भव पु९ंसे पुत्राय वेत्तवै श्रियै पुत्राय वेत्तवा एहि सूनृते ॥ **14**

***(अग्रतः षट्च) (K3) (16)***

--------------------------------------------------------------------

## 1.4 विवाहे प्रधानाहुतिमन्त्राः

### 1.4.1 प्रधानाहुतिमन्त्राः

सोमाय जनिविदे स्वाहा **1,**

गन्धर्वाय जनिविदे स्वाहा **2,**

ऽग्नये जनिविदे स्वाहा ॥ **3**

कन्यला पितृभ्योयती पतिलोकमव दीक्षामदास्थ स्वाहा ॥ **4**

प्रेतो मुञ्चाति नामुतः सुबद्धाममुतस्करत् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगाऽसति ॥ **5**

इमां त्वमिन्द्र मीढ्वः सुपुत्रा९ं सुभगां कुरु (कृणु) ।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥ **6**

अग्निरैतु प्रथमो देवताना॒ँ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदय॒ँ राजा वरुणोऽनुमन्यतां ँयथेय॑ँ स्त्री पौत्रमघं न रोदात् ॥ 7

इमामग्निस्त्रायतां गार्.हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि
प्रबुद्ध्यतामियम् ( ) ॥ 8

मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः सँविशन्तु ।
मा त्वं ँविकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती
प्रजा॒ँ सुमनस्यमानाम् ॥ 9

द्यौस्ते पृष्ठ॒ँ रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्त॒ँ
सविताऽभिरक्षतु । आ वाससः परिधानाद्–बृहस्पतिर् विश्वेदेवा
अभिरक्षन्तु पश्चात् ॥ 10

अप्रजस्तां पौत्र मृत्युं पाप्मानमुत वाऽघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रति मुञ्चामि पाशम् ॥ 11

इमं मे वरुण 12{ }, तत्त्वा यामि 13{ }, त्वन्नो अग्ने 14{ },

स त्वन्नो अग्ने15 { } , त्वमग्ने अयाऽस्यया 16 सन्मनसा हितः ।

अया सन्. हव्यमूहिषेऽया नो धेहि भेषजम् ॥ 17

**Expansion for - इमं मे वरुण12, तत्त्वा यामि 13, त्वन्नो अग्ने 14, स त्वन्नो अग्ने 15**

इमं मे वरुण श्रुधी हवमद्या च मृडय ।

त्वामवस्युरा चके ॥ 12 (Ref - TS 2.1.11.6)

तत्त्वा यामि ब्रह्मणा वन्दमान–स्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्रमोषीः ॥ 13

(Ref - TS 2.1.11.6)

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासि सीष्ठाः ।

यजिष्ठो वह्नि तमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ 14

(Ref TS 2.5.12.3)

स त्वंनो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥ **15**

(**Ref - TS.2.5.12.3**)

*(इयमष्टौ च ) (K4) (18)*

-----------------------------------------------------------------

## 1.5 अश्मास्थापनाद्यः

### 1.5.1. अश्मास्थापनम्

आ तिष्ठेममश्मान–मश्मेव त्वꣳ स्थिरा भव ।
अभितिष्ठ पृतन्यतः सहस्व पृतनायतः ॥ **1**

### 1.5.2. लाजहोमप्रदक्षिणादि.

इयं नार्युपब्रूते कुल्पान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिर् जीवातु शरदः शतम् ॥ **2**

तुभ्यमग्रे पर्यवहन्थ् सूर्यां वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥ **3**

पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिः स एतु शरदः शतम् ॥ **4**

विश्वा उत त्वया वयं धारा उदन्या इव ।
अतिगाहेमहि द्विषः ( ) ॥ **5**

आ तिष्ठेममश्मानम् ॥ **6**

अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अद्ध्वरः प्रेतो मुञ्चाति नामुतः
सुबद्धाममुतस्करत् ॥ **7**

तुभ्यमग्रे पर्यवहन् **8**, पुनः पत्नीमग्निरदाद् **9**,
विश्वा उत त्वया वय **10**, मा तिष्ठेममश्मानम् ॥ **11**

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावथ्–स्वर्यं बिभर्.षि ।
अञ्जन्ति वृक्ष७ुं सुधितं न गोभिर्–यद्–दम्पती समनसा
कृणोषि ॥ **12**

तुभ्यमग्रे पर्यवहन् 13 पुनः पत्नीमग्निरदाद् 14

विश्वा उत त्वया वयम् ॥ 15

**1.5.3. योक्त्रविमोचनम्**

प्र त्वा मुञ्चामि वरुणस्य पाशाद्–येन त्वाऽबध्नाथ् सविता सुकेतः ।

धातुश्च योनौ सुकृतस्य लोके स्योनं ते सह पत्या

करोमि (कृणोमि) ॥ 16

इमं ँविष्यामि वरुणस्य पाशं ँयमबध्नीत सविता सुशेवः ( ) ।

धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या

करोमि (कृणोमि) ॥ 17

**1.5.4 अनुगतस्यौपासनाग्नेः समाधान मन्त्राः**

अयाश्चाग्ने ऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि ।

अयसा मनसा धृतोऽयसा हव्यमूहिषेऽया नो धेहि भेषजम् ॥ 18

*( द्विषः – सुशेव– स्त्रीणि च) (K5) (23)*

----------------------------------------------------------------------

## 1.6 विवाहे प्रयाणकाले स्थस्योत्तम्भनी

### 1.6.1. प्रयाणकाले स्थस्योत्तम्भनी

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥ 1

### 1.6.2. वाहयोजनम्

युञ्जन्ति ब्रद्ध्नं 2 { } , ँयोगेयोगे 3 { } ॥

**Expansion for युञ्जन्ति ब्रद्ध्नं 2, ँयोगेयोगे 3**

युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः ।
रोचन्ते रोचना दिवि ॥ 2 (**Ref - TS 7.4.20.1**)

योगेयोगे तवस्तरं ँवाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥ 3 (**Ref - TS 4.1.2.1**)

### 1.6.3. आरोहणकालेऽभिमन्त्रणम्

सुकिꣳशुकꣳ शल्मलिं ँविश्वरूपꣳ हिरण्यवर्णꣳ सुवृतꣳ सुचक्रम् ।
आरोह वद्ध्वमृतस्य लोकꣳ स्योनं पत्ये वहतुं कृणुष्व ॥ 4

उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः ।
मूर्द्धानं पत्युरारोह प्रजया च विराड्भव ॥ 5

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रुवां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ 6

स्नुषाणाᳮ श्वशुराणां प्रजायाश्च धनस्य च ( ) ।
पतीनां च देवॄणां च सजातानां ँविराड्भव ॥ 7

**1.6.4. वर्त्मनोस्सूत्रस्तरणम्**

नीललोहिते भवतः कृत्या सक्तिर्व्यज्यते ।
एधन्तेऽस्या ज्ञातयः पतिर्बन्धेषु बद्ध्यते ॥ 8

**1.6.5 ततुपरि गमनं**

ये वद्ध्वश्चन्द्रं ँवहतुं ँयक्ष्मा यन्ति जनाᳮ अनु ।
पुनस्तान्. यज्ञिया देवा नयन्तु यत आगताः ॥ 9

मा विदन्परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर् दुर्गमतीता-मपद्रान्त्वरातयः ॥ 10

सुगं पन्थान–मारुक्ष–मरिष्ट॰ स्वस्तिवाहनम् ।
यस्मिन् वीरो न रिष्यत्यन्येषां ँविन्दते वसु ॥ 11

*(धनस्य च – नव च) (K6) (19)*

--------------------------------------------------------------------------------

## 1.7 विवाहे तीर्थादिव्यतिक्रमजपाद्यः

### 1.7.1. तीर्थादिव्यतिक्रमे जपः

ता मन्दसाना मनुषो दुरोण आधत्त॰ रयिं दशवीरं ँवचस्यवे ।
कृतं तीर्थ॰ सुप्रपाण॰ शुभस्पती स्थाणुं पथेष्ठामप दुर्मति॰
हतम् ॥ 1

### 1.7.2. नावोऽनुमन्त्रणम्

अयन्नो मह्याः पार॰ स्वस्ति नेषद्–वनस्पतिः ।
सीरा नः सुतरा भव दीर्घायुत्वाय वर्चसे ॥ 2

### 1.7.3. तीर्त्वा जपः

अस्य पारे निर्.ऋथस्य जीवा ज्योतिरशीमहि ।
मह्या इन्द्रः स्वस्तये ॥ 3

### 1.7.4. श्मशानादिव्यतिक्रमे होमः

यदृते चिदभि श्रिषः पुरा जर्तृभ्य आतृदः ।

सन्धाता सन्धिं मघवा पुरोवसुर्निष्कर्ता विह्रुतं पुनः ॥ 4

इडामग्न 5 { }. इमं मे वरुण 6 { }. तत्त्वा यामि 7 { }. त्वन्नो

अग्ने 8 { }. स त्वन्नो अग्ने 9 { }. त्वमग्ने अयासि { } ॥ 10

**Expansion for इडामग्न 5, इमं मे वरुण (6). तत्त्वा यामि 7, त्वन्नो अग्ने 8 , स त्वन्नो अग्ने 9, त्वमग्ने अयासि 10.**

इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।

स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर् भूत्वस्मे ॥ 5

(Ref - TS 4.2.4.3)

इमं मे वरुण श्रुधी हवमद्या च मृडय ।

त्वामवस्युरा चके ॥ 6 (Ref - TS.2.5.12.3)

तत्त्वा यामि ब्रह्मणा वन्दमान–स्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥ 7

(Ref - TS 2.5.12.3)

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासि सीष्ठाः ।
यजिष्ठो वह्नि तमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ 8
(Ref TS 2.5.12.3)

स त्वंनो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥ 9
(Ref - TS 2.5.12.3)

त्वमग्ने अयाऽसि । अया सन्मनसा हितः । अया सन्.हव्यमूहिषे ।
अया नो धेहि भेषजम् । इष्टो अग्निराहुतः । स्वाहाकृतः पिपर्तु नः ।
स्वगा देवेभ्य इदं नमः ॥ 10 (Ref TB 2.4.1.9 )

## 1.7.5. क्षीरिवृक्षाद्यतिक्रमे जपः

ये गन्धर्वा अफ्सरसश्च देवीरेषु वृक्षेषु वानस्पत्येष्वासते ( ) ।
शिवास्ते अस्यै वद्ध्वै भवन्तु मा हिꣳसिषुर्–वहतुमूह्यमानाम् ॥ 11

## 1.7.6. नद्याद्यतिक्रमे जपः

या ओषधयो या नद्यो यानि धन्वानि ये वना ।
ते त्वा वधु प्रजावतीं प्र त्वे मुञ्चन्त्वꣳहसः ॥ 12

**1.7.7. वद्ध्वै गृहप्रदर्शनम्**

संकाशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण । पर्याणद्धं

विश्वरूपं यदस्याꣳ स्योनं पतिभ्यः सविता कृणोतु तत् ॥ 13

**1.7.8. वाहयोविमोकः**

आवामगन्थ् सुमतिर् वाजिनीवसून्यश्विना हृथ्सु कामाꣳ अयꣳसत ।

अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याꣳ अशीमहि ॥ 14

अयन्नो देवः सविता बृहस्पति-रिन्द्राग्नी मित्रावरुणा स्वस्तये । त्वष्टा

विष्णुः प्रजया सꣳरराणः काम आयातं कामाय त्वा विमुञ्चतु ॥ 15

*(आसते नव च) (K7) (19)*

## 1.8 विवाहे चर्मास्तरणाद्यः

**1.8.1. चर्मास्तरणम्**

शर्म वर्मेदमाहरास्यै नार्या उपस्तिरे ।

सिनीवालि प्रजायतामियं भगस्य सुमतावसत् ॥ 1

**1.8.2. गृहप्रवेशे वाचनम्**

गृहान्-भद्रान्थ्-सुमनसः प्रपद्येऽवीरघ्नी वीरवतः सुवीरान् ।

इरां वहतो घृतमुक्षमाणास्तेष्वहꣳ सुमनाः सम् विशामि ॥ 2

### 1.8.3 प्रविश्य होमः

आगन् गोष्ठं महिषी गोभि–रश्वै–रायुष्मत्पत्नी प्रजया स्वर्वित् ।
बह्वीं प्रजां जनयन्ती सुरत्नेममग्नि॰ शतहिमाः सपर्यात् ॥ 3

अयमग्निर् गृहपतिः सुस॰सत् पुष्टिवर्द्धनः ।
यथा भगस्याभ्यां ददद्–रयिं पुष्टिमथो प्रजाम् ॥ 4

प्रजाया आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम् ।
यथैनयोर्न प्रमीयाता उभयोर्जीवतोः प्रजा ( ) ॥ 5

तेन भूतेन हविषाऽयमाप्यायतां पुनः ।
जायां ँयामस्मा आवाक्षुस्ता॰ रसेनाभिवर्द्धताम् ॥ 6

अभिवर्द्धतां पयसाऽभि राष्ट्रेण वर्द्धताम् ।
रय्या सहस्रपोषसेमौ स्तामनपेक्षितौ ॥ 7

इहैव स्तं मा वियोष्टं ँविश्वमायुर्–व्यश्नुतम् ।
मह्या इन्द्रः स्वस्तये ॥ 8

ध्रुवैधि पोष्या मयि मह्यं त्वाऽदाद्-बृहस्पतिः ।
मया पत्या प्रजावती सञ्जीव शरदश्शतम् । 9

त्वष्टा जाया-मजनयत् त्वष्टाऽस्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूꣳषि दीर्घमायुः कृणोतु वाम् ( ) ॥ 10

इमं मे वरुण11{ }, तत्त्वा यामि12 { }, त्वन्नो अग्ने13 { },
स त्वन्नो अग्ने14{ }, त्वमग्ने अयाऽसि { } ॥ 15

**Expansion for इमं मे वरुण11, तत्त्वा यामि12 , त्वन्नो अग्ने13 , स त्वन्नो अग्ने14, त्वमग्ने अयाऽसि**
**(Same as given in - EAK 1.7.4 )**

*(जीवतोः प्रजा-वामेकं च) (K8) (21)*

---

## 1.9 विवाहे चर्मोपवेशनाद्यः

### 1.9.1. चर्मोपवेशनं

इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो रायस्पोषो निषीदतु ॥ 1

### 1.9.2. षालकाय फलदानम्

सोमेनादित्या बलिनः सोमेन पृथिवी दृढा ।
अथो नक्षत्राणा–मेषामुपस्थे सोम आधितः ॥ 2

प्रस्वः स्थः प्रेयं प्रजया भुवने शोचेष्ट ॥ 3

### 1.9.3. गृहप्रवेशे जपः

इह प्रियं प्रजया ते समृद्ध्यता–मस्मिन् गृहे गार्.हपत्याय जागृहि ।
एना पत्या तन्व॑ स॑सृजस्वाथा जीव्री विदथ–मावदासि ॥ 4

सुमङ्गलीरियं ँवधूरिमा॑ समेत पश्यत ।
सौभाग्यमस्यै दत्वायाथास्तं ँविपरेतन ॥ 5

### 1.9.4. ध्रुवारुन्धाति दर्शनम्

ध्रुवक्षितिर्–ध्रुवयोनिर्–ध्रुवमसि ध्रुवतः स्थितम् ( ) ।
त्वन्नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥ 6

सप्तर्.षयः प्रथमां कृत्तिकाना–मरुन्धतीम् ।

यद्ध्रुवता७ं ह निन्युः षट्कृत्तिका मुख्ययोगं ँवहन्तीय–

मस्माकमेधत्वष्टमी ॥ 7

**1.9.5 उपकारणसमापनयोः काण्डर्षीणामनन्तरं होमः**

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।

सनिं मेधामयासिषम् ॥ 8

**1.9.6. स्वयम् प्रज्वलितेऽग्नौ समिदाधानम्**

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्.ऋतिं मम ।

पशू७श्च मह्यमावह जीवनञ्च दिशो दिश (दश) ॥ 9

मा नो हि७ंसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि

श्रिया मा परिपातय ॥ 10 ***(ध्रुवतः स्थितं नव च) (K9) (19)***

---

## 1.10 विवाहे दाण्डोत्थापन मन्त्राद्यः

### 1.10.1. दाण्डोत्थापन मन्त्रौ

उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा ।
अन्यामिच्छ प्रफर्व्य॑ सञ्जायां पत्या सृज ॥ 1

उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरी ।
अन्यामिच्छ पितृषदं व्यक्ता॑ स ते भागो जनुषा तस्य विद्धि ॥ 2

### 1.10.2 चतुर्थी होमः

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः
प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी
जारघ्नीमस्यै तां कृणोमि स्वाहा ॥ 3

वायो प्रायश्चित्त 4 *, आदित्य प्रायश्चित्ते 5 *,
प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः
प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी
जारघ्नीमस्यै तां कृणोमि स्वाहा ॥ 6

**अनुषङ्गः from 4 to 5**

वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः
प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी
जारघ्नीमस्यैतां कृणोमि स्वाहा । 4

आदित्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः
प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी
जारघ्नीमस्यैतां कृणोमि स्वाहा । 5

प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चान्तरिक्षं च
सिन्धुश्च समुद्रश्च सरस्वाँश्च विश्वव्यचाश्च ते यं द्विष्मो यश्च नो द्वेष्टि
तमेषां जम्भे दद्ध्मः स्वाहा ॥ 7

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च
सहस्यश्च तपश्च तपस्यश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे
दद्ध्मः स्वाहा ॥ 8

चित्तञ्च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च विज्ञातं च विज्ञानं च नाम च क्रतुश्च दर्.शश्च पूर्णमासश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दद्ध्मः स्वाहा ॥ 9

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहो॰ स्वाहा ( ) ॥ 10

*(उदीर्ष्वातो दश ) (K10) (10)*

--------------------------------------------------------------------

## 1.11 विवाहे वधवरयोरन्योन्य समीक्षणाद्यः

### 1.11.1. वधवरयोरन्योन्यं समीक्षणं

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।
इह प्रजामिह रयिꣳ रराणः प्रजायस्व प्रजया पुत्रकाम ॥ 1

अपश्यं त्वा मनसा दीद्ध्याना॰ स्वायां तनूꣳ ऋत्विये नाथमानाम् ।
उप मामुच्चा युवतिर् बुभूयाः प्रजायस्व प्रजया पुत्रकामे ॥ 2

### 1.11.2. आज्यशेषेण हृदयदेशे समञ्जनम्

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दिदेष्टु नौ ॥ 3

**1.11.3 समञ्जने जपः**

प्रजापते तन्वं मे जुषस्व त्वष्टर् देवेभिः सहसाम इन्द्र ।
विश्वैर् देवै रातिभिः स॒ंरराणः पु॒ंसां बहूनां मातरः स्याम ॥ 4

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोक-माविश शन्नो भव द्विपदे शं चतुष्पदे () ॥ 5

तां पूषञ्छिवतमा-मेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ॥ 6

*(शं चतुष्पदे द्वे च ) (K11) (12)*

---

## 1.12 विवाहे समावेशन जपः

**1.12.1.समावेशनकाले जपः**

आरोहोरु-मुपबर्.हस्व बाहुं परिष्वजस्व जाया॒ं सुमनस्यमानः ।
तस्यां पुष्यतं मिथुनौ सयोनी बह्वीं प्रजां जनयन्तौ सरेतसा ॥ 1

आर्द्रयाऽरण्या यत्रामन्थत्-पुरुषं पुरुषेण शक्रः ।
तदेतौ मिथुनौ सयोनी प्रजयाऽमृतेनेह गच्छतम् ॥ 2

अहं गर्भमदधा–मोषधीष्वहं ँविश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयं पितृणामहं जनिभ्यो अपरीषु पुत्रान् ॥ 3

पुत्रिणेमा कुमारिणा विश्वमायुर् व्यश्नुतम् ।
उभा हिरण्यपेशसा वीतिहोत्रा कृतद्–वसू ॥ 4

दशास्यं त्वाऽमृताय कꣳ शमूधो रोमशꣳ हथो देवेषु कृणुतो
दुवः ॥ 5 *(आरोह नव) (K12) (9)*

**(विवाहमन्त्राः समाप्तः)**

---

## 1.13 गर्भधाने ऋतुसमावेशः

### 1.13.1.ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं

विष्णुर् योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु ।
आसिञ्चतु प्रजापतिर् धाता गर्भं दधातु ते ॥ 1

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भन्ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ 2

हिरण्ययी अरणी यं निर्मन्थतो अश्विना ।
तन्ते गर्भꣳ हवामहे दशमे मासि सूतवे ॥ 3

यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे ।
एवं त्वं गर्भमाधथ्स्व दशमे मासि सूतवे ॥ 4

यथा पृथिव्यग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते ( ) ॥ 5

विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् ।
पुमाꣳसं गर्भमाधेहि दशमे मासि सूतवे ॥ 6

नेजमेष परापत सुपुत्रः पुनरापत ।
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् ॥ 7

व्यस्य योनिं प्रति रेतो गृहाण पुमान् पुत्रो धीयतां गर्भो अन्तः ।
तं माता दशमासो बिभर्तु स जायतां ँवीरतमः स्वानाम् ॥ 8

आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम् ।
आ वीरो जायतां पुत्रस्ते दशमास्यः ॥ 9 (13)

*(गर्भं दधामि तेऽष्टौ च) (K13) (18)*

---

## 1.14 ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं

### 1.14.1.ऋतुसमावेशनकाले भार्याया अभिमन्त्रणं

करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते ।
अनूनः पूर्णो जायता–मश्लोणो–ऽपिशाचधीतः ॥ 1

पुमाꣳस्ते पुत्रो नारि तं पुमाननुजायताम् ।
तानि भद्राणि बीजान्यृषभा जनयन्तु नौ ॥ 2

यानि भद्राणि बीजान्यृषभा जनयन्ति नः ।
तैस्त्वं पुत्रान्. विन्दस्व सा प्रसूर्धेनुका भव ॥ 3

काम प्रमृद्ध्यतां मह्यमपराजितमेव मे ।
यं कामं कामये देव तं मे वायो समर्द्धय ॥ 4

**(गर्भधाने ऋतुसमावेश मन्त्राः समाप्तः)**

**1.14.2. अर्थप्राध्वस्य परिक्षवपरिकासने जपः**

अनुहवं परिहवं परीवादं परिक्षपम् ।
दुःस्वप्नं दुरुदितं तद्–द्विषद्भ्यो दिशाम्यहम् ( ) ॥ 5

अनुहूतं परिहूतꣳ शकुनेर्–यदशाकुनम् ।
मृगस्य सृतमक्ष्णया तद्–द्विषद्भ्यो दिशाम्यहम् ॥ 6

**1.14.3 चित्रियस्य वनस्पतेरभिमन्त्रणम्**

आरात्ते अग्निरस्त्वारात्–परशुरस्तु ते । निवाते त्वाऽभि वर्.षतु
स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पते ॥ 7

**1.14.4 शकृद्रितेरुपस्थानम्**

नमः शकृथ्सदे रुद्राय नमो रुद्राय शकृथ्सदे ।
गोष्ठमसि नमस्ते अस्तु मा मा हिꣳसीः [ ] 8

**1.14.5. सिग्वातस्याभिमन्त्रणम्**

सिगसि नसि वज्रो नमस्ते अस्तु मा मा हिꣳसीः ॥ 9

**1.14.6. शकुनेरभिमन्त्रणम्**

उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु श॒ꣳससि ।

स्वस्ति नः शकुने अस्तु प्रति नः सुमना भव ॥ **10**

***(अहमष्टौ च) (K14) (18)***

---

## 1.15 दम्पत्योर्–हृदयविश्लेषे हृदय–संसर्गेफ्सोर्–होमः

**1.15.1 दम्पत्योर्–हृदयविश्लेषे हृदय–संसर्गेफ्सोर्–होमः**

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर् मित्रावरुणा प्रातरश्विना ।

प्रातर् भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम ॥ **1**

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।

आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ **2**

भग प्रणेतर् भग सत्यराधो भगेमां धियमुदव ददन्नः ।

भग प्रणो जनय गोभिरश्वैर् भग प्रनृभिर् नृवन्तः स्याम ॥ **3**

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।

उतोदिता मघवन्थ् सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥ **4**

भग एव भगवाꣳ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीमि स नो भग पुर एता भवेह ( ) ॥ 5

समध्वरायोषसो ऽनमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं ँवसुविदं भगन्नो रथमिवाश्वा वाजिन आवहन्तु ॥ 6

अश्वावतीर् गोमतीर् न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वत प्रपीना यूयं पात स्वस्तिभिः सदा नः ॥ 7

***(भवेह चत्वारि च) (K15) (14)***

---

## 1.16 पत्युर्वशीकरणं कर्म

### 1.16.1. पत्युर्वशीकरणं कर्म

इमां खनाम्योषधीं ँवीरुधं बलवत्तमाम् ।
यया सपत्नीं बाधते यया सम्ँविन्दते पतिम् ॥ 1

उत्तानपर्णे सुभगे सहमाने सहस्वति ।
सपत्नीं मे पराधम पतिं मे केवलं कृधि ॥ 2

उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः ।

अथा सपत्नी या ममाधरा साऽधराभ्यः ॥ 3

न ह्यस्यै नाम गृभ्णामि नो अस्मिन् रमते जने ।

परामेव परावतꣳ सपत्नीं नाशयामसि ॥ 4

अहमस्मि सहमानाऽथ त्वमसि सासहिः ।

उभे सहस्वती भूत्वा सपत्नीं मे सहावहै ( ) ॥ 5

उप तेऽधाꣳ सहमानामभि त्वाऽधाꣳ सहीयसा ।

मामनु प्र ते मनो वथ्सं गौरिव धावतु पथा वारिव धावतु ॥ 6

***(सहावहै द्वे च) (K16) (12)***

---------------------------------------------------------------

## 1.17 सपत्नीबाधनं कर्म

### 1.17.1. सपत्नीबाधनं कर्म

उदसौ सूर्यो अगादुदयं मामको भगः ।
अहं तद्–विद्वला पतिमभ्यसाक्षि विषासहिः ॥ 1

अहं केतुरहं मूर्धाऽहमुग्रा विवाचनी ।
ममेदनु क्रतुं पतिः सेहानाया उवाचरेत् ॥ 2
मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ।
उताहमस्मि सञ्जया पत्युर्मे श्लोक उत्तमः ॥ 3

येनेन्द्रो हविषा कृत्यभवद्–दिव्युत्तमः ।
अहं तदक्रि देवा असपत्ना किलाभवम् ॥ 4

असपत्ना सपत्निघ्नी जयन्त्यभिभूवरी (भूवरीः) ।
आविथ्सि सर्वासाꣳ राधो वर्चो अस्थेयसामिव ( ) ॥ 5

समजैषमिमा अहꣳ सपत्नीरभिभूवरीः ।

यथाऽहमस्य वीरस्य विराजामि धनस्य च ॥ 6

*(अस्थेयसामिव द्वे च) (K17) (12)*

-------------------------------------------------------------------

## 1.18 वध्वाः यक्ष्मादिहरं कर्म

### 1.18.1 वध्वाः यक्ष्मादिहरं कर्म

अक्षीभ्यान्ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि ।

यक्ष्मꣳ शीर्.षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ॥ 1

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्योऽनूक्यात् ।

यक्ष्मं दोषण्यमꣳसाभ्यां बाहुभ्यां ँविवृहामि ते ॥ 2

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्. हृदयादधि ।

यक्ष्मं मतस्नाभ्यां ँयक्नः प्लाशिभ्यो विवृहामि ते ॥ 3

ऊरुभ्यां तेऽष्ठीवद्भ्यां जङ्घाभ्यां प्रपदाभ्याम् ।

यक्ष्मꣳ श्रोणीभ्यां भासदाद्ध्वꣳससो विवृहामि ते ॥ 4

मेहनाद्-वलङ्करणा-ल्लोमभ्यस्ते नखेभ्यः ।
यक्ष्मꣳ सर्वस्मादात्मनस्तमिमं ँविवृहामि ते ( ) ॥ 5
अङ्गादङ्गा-ल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मꣳ सर्वस्मादात्मनस्तमिमं ँविवृहामि ते ॥ 6

परादेहि शाबल्यं ब्रह्मभ्यो विभजा वसु ।
कृत्यैषा पद्वती भूत्वा जायाऽऽविशते पतिम् ॥ 7

अश्लीला तनूर्भवति (तनूर्भव) रुशती पापयाऽमुया ।
पतिर्-यद्-वद्ध्वै वाससा स्वमङ्गमभि धित्सति ॥ 8

क्रूरमेतत् कटुक-मेतदपाष्ठवद्-विषवन्नैतदत्तवे ।
सूर्यां ँयः प्रत्यक्षं ँविद्यात्स एतत् प्रतिगृह्णीयात् ॥ 9
आशसनं ँविशसनमथो अधि विचर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शꣳसति ( ) ॥ 10
*( इमं ँविवृहामि ते - शꣳसति ) (K18) (20)*

====================

**Special Korvai for 1.18**

(अक्षीभ्यां ग्रीवाभ्य आन्त्रेभ्य ऊरुभ्यां मेहनादङ्गादङ्गात्
परोदेहि सप्त)

**Prapaataka Korvai with starting Padams of 1 to 18 Khandaas**

(प्रसुग्मन्ताऽष्टादश – हिरण्यवर्णाः पञ्चदश – सोमः प्रथमः षोडश
– सोमाय जनिविदे ऽष्टादशा – तिष्ठेयं त्रयोवि॒ꣳशतिः –
सत्येन – ता मन्दसा नैकान्नवि॒ꣳशति रेकान्नवि॒ꣳशतिः – शर्म
वर्मैकवि॒ꣳशति– रिह गाव एकान्नवि॒ꣳशति – रुदीष्वर्तो दशा –
पश्यन् त्वा द्वदशा – रोहोरुं नव – विष्णुर्योनिं – करोमि ते
ऽष्टादशा ष्टादश – प्रातरग्निं चतुर्दशे – मां खना – म्युदसौ सूर्यो
द्वादश द्वादशा – क्षीभ्यां ते वि॒ꣳशति रष्टादश )

**Korvai with starting Padams of 1, 11, Series of Khandaas :-**

(प्रसुग्मन्ता – ऽपश्यन् त्वाऽष्टादश)

**First and Last Padam in EAK, 1st Prapaatakam :-**

(प्रसुग्मन्ता – तानि ब्रह्मोत शꣳसति )

। हरिः ओम् ।

## एकाग्निकाण्डे प्रथम प्रपाठकः समाप्तः

## Ekaagni Kaandam Counts - 1st Prapaatakam

| | Vaakyams |
|---|---|
| Khanda 1 | 18 |
| Khanda 2 | 15 |
| Khanda 3 | 16 |
| Khanda 4 | 18 |
| Khanda 5 | 23 |
| Khanda 6 | 19 |
| Khanda 7 | 19 |
| Khanda8 | 21 |
| Khanda 9 | 19 |
| Khanda 10 | 10 |
| Khanda 11 | 12 |
| Khanda 12 | 9 |
| Khanda 13 | 18 |
| Khanda 14 | 18 |
| Khanda 15 | 14 |
| Khanda 16 | 12 |
| Khanda 17 | 12 |
| Khanda - 18 | 20 |
| Total → | 293 |

# 2 कृष्णयजुर्वेदीय एकाग्निकाण्डः – द्वितीयः प्रपाठकः

## 2.1 उपनयनमन्त्राः

### 2.1.1 क्षुर कर्म

उष्णेन वायवुदकेनेह्यदितिः केशान्. वपतु ॥ 1

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे ।
ज्योक्च सूर्यं दृशे ॥ 2

येनावपथ् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्. यथाऽसदयमसौ ॥ 3

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् ।
तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥ 4

येन भूयश्चरात्ययं ज्योक्च पश्याति सूर्यम् ।
तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥ 5

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् ( ) ।
तेन ते वपाम्यसावायुषा वर्चसा यथा ज्योक्सुमना असाः ॥ 6

यत् क्षुरेण मर्चयता सुपेशसा वप्त्रा वपसि केशान् ।
शुन्धि शिरो माऽस्यायुः प्रमोषीः ॥ 7

उप्त्वाय केशान्. वरुणस्य राज्ञो बृहस्पतिः सविता सोमो अग्निः ।
तेभ्यो निधानं बहुधाऽन्वविन्द–न्नन्तरा द्यावापृथिवी अपः सुवः ॥ 8

*(आयुषेऽवपत्पञ्च च)* **(K1) (15)**

---

## 2.2 उपनयनमन्त्राः

### 2.2.1.समिदाधानम्

आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने ।
घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमम् ॥ 1

### 2.2.2. अश्मास्तापनम्

आतिष्ठेममश्मानमश्मेव त्व७ स्थिरो भव ।
अभितिष्ठ पृतन्यतः सहस्व पृतनायतः ॥ 2

### 2.2.3. वासः परिधानम्

रेवतीस्त्वा व्यक्ष्णन् कृत्तिकाश्चाकृन्त७स्त्वा ।
धियोऽवयन्नवग्ना अवृञ्जन्थ्–सहस्रमन्ता७ँ अभितो अयच्छन् ॥ 3

देवीर् देवाय परिधी सवित्रे ।
महत्तदा–सामभवन्–महित्वनम् ॥ 4

या अकृन्तन्नवयन्. या अतन्वत याश्च देवीरन्तानभितो–ऽददन्त ।
तास्त्वा देवीर्–जरसे सम्ँव्ययन्त्वायुष्मानिदं परिधथ्स्व
वासः ( ) ॥ 5

परिधत्त धत्त वाससैनꣳ शतायुषं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद्–वास एतथ्सोमाय राज्ञे परिधातवा उ ॥ 6

जरां गच्छासि परिधथ्स्व वासो भवा कृष्टीना–मभिशस्तिपावा ।
शतं च जीव शरदः सुवर्चा रायश्च पोषमुप सम्ँव्ययस्व ॥ 7

परीदं ँवासो अधिधाः स्वस्तये–ऽभूरापीना–मभिशस्तिपावा ।
शतं च जीव शरदः पुरूचीर्.वसूनि चार्यो विभजासि जीवन्न् ॥ 8

**2.2.4. मौञ्ज्यजनि मन्त्राः**

इयं दुरुक्तात् परिबाधमाना शर्म वरूथं पुनती न आगात् ।
प्राणापानाभ्यां बलमाभरन्ती प्रिया देवाना॒ँ सुभगा मेखलेयम् ॥ 9

ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः सहमाना अरातीः । सा नः
समन्तमनु परीहि भद्रया भर्तारस्ते मेखले मा रिषाम ( ) ॥ 10

मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविर॒ँ समिद्धम् ।
अनाहनस्यं ँवसनं जरिष्णु परीदं ँवाज्यजिनं दधेऽहम् ॥ 11

*( वासो – मरिषाम द्वे च) (K2) (21)*

----------------------------------------------------------------------

## 2.3 उपनयनमन्त्राः

### 2.3.1. अग्रेरुत्तरतोऽवस्थापनम् प्रोक्षणम् हस्तग्रहणम् परिदानम् उपनयनम् कर्ण जपः प्रश्न–प्रतिवचनं च

आगन्त्रा समगन्महि प्रसु मृत्युं युयोतन ।
अरिष्टाः सञ्चरेमहि स्वस्ति चरतादिह स्वस्त्या गृहेभ्यः ॥ 1

समुद्रादूर्मिर् मधुमाँ उदारदुपाँशुना सममृतत्वमश्याम् ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आयन्न् ॥ 2

अग्निष्टे हस्तमग्रभीथ् 3, सोमस्ते हस्तमग्रभीथ् 4 ,
सविता ते हस्तमग्रभीथ् 5, सरस्वती ते हस्तमग्रभीत् 6,
पूषा ते हस्तमग्रभी 7, दर्यमा ते हस्तमग्रभी 8,
दँशुस्ते हस्तमग्रभीद् 9, भगस्ते हस्तमग्रभीन् 10.
मित्रस्ते हस्तमग्रभीन् 11, मित्रस्त्वमसि धर्मणाऽग्निराचार्यस्तव ॥ 12

अग्नये त्वा परिददाम्यसौ 13, सोमाय त्वा परिददाम्यसौ 14,
सवित्रे त्वा परिददाम्यसौ 15, सरस्वत्यै त्वा परिददाम्यसौ 16.
मृत्यवे त्वा परिददाम्यसौ 17. यमाय त्वा परिददाम्यसौ 18.

गदाय त्वा परिददाम्यसा 19, वन्तकाय त्वा परिददाम्यसा 20,

वद्भ्यस्त्वा परिददाम्यसा 21, वोषधीभ्यस्त्वा परिददाम्यसौ 22,

पृथिव्यै त्वा सवैश्वानरायै परिददाम्यसौ ॥ 23

देवस्य त्वा सवितुः प्रसव उपनयेऽसौ ॥ 24

सुप्रजाः प्रजया भूयाः सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः॥ 25

ब्रह्मचर्यमागामुप मा नयस्व देवेन सवित्रा प्रसूतः ॥ 26

को नामास्यसौ नामाऽस्मि कस्य ब्रह्मचार्यस्यसौ प्राणस्य

ब्रह्मचार्यस्म्यसा 27

वेष ते देव सूर्य ब्रह्मचारी तं गोपाय स मा मृतैष ते सूर्यपुत्रः

सुदीर्घायुः समामृत ( ) । या७ स्वस्तिमग्निर् वायुः सूर्यश्चन्द्रमा

आपोऽनु सञ्चरन्ति ता७ स्वस्तिमनु सञ्चरासौ ॥ 28

अवद्ध्वनामद्ध्वपते श्रेष्ठस्याद्ध्वनः पारमशीय ॥ 29

*(समामृत द्वे च) (K3) (12)*

## 2.4 उपनयनमन्त्राः

### 2.4.1.होम मन्त्राः

योगेयोगे तवस्तर 1{ }, मिममग्न आयुषे वर्चसे कृधीति द्वे 2 { } ॥

**Expansion for - योगेयोगे तवस्तर 1,**

**मिममग्न आयुषे वर्चसे कृधीति द्वे 2**

योगेयोगे तवस्तरं ँवाजेवाजे हवामहे ।

सखाय इन्द्रमूतये ॥ 1 (Ref - TS 4.1.2.1)

इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन् ।

मा तेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत् ॥ 2

(Ref - TS 2.3.10.3)

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर् गन्तोः ॥ 3

अग्निष्ट आयुः प्रतरां दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु ।

इन्द्रो मरुद्भिर्. ऋतुधा कृणोत्वादित्यैस्ते वसुभिरादधातु ॥ 4

मेधां मह्यमङ्गिरसो मेधा॑ सप्तर्.षयो॑ ददुः ।
मेधां मह्यं प्रजापतिर् मेधामग्निर् ददातु मे ॥ 5

अफ्सरासु च या मेधा गन्धर्वेषु च यद्यशः ।
दैवी या मानुषी मेधा सा मामाविशतादिह ॥ 6

इमं मे वरुण7{ }, तत्त्वा यामि 8 { }, त्वन्नो अग्ने 9 { }.
स त्वन्नो अग्ने 10{ }, त्वमग्ने अयासि ( ) ॥ 11

**Expansion for – इमं मे वरुण 7, तत्त्वा यामि 8 , त्वन्नो अग्ने 9 . स त्वन्नो अग्ने 10, त्वमग्ने अयासि 11 .**
**(Same as given in EAK 1.7.4 )**

### 2.4.2. कूर्चारोहणम्

राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषम् ॥ 12

### 2.4.3. सावित्री

तथ् सवितुर्वरेण्यमित्येषा { } ॥ 13

**Expansion for – तथ् सवितुर्वरेण्यं**

तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो योनः प्रचोदयात् । (**Ref - TS 1.5.6.4**)

**2.4.4. ओष्टकर्णोपस्पर्.शनं**

अवृधमसौ सौम्य प्राण स्वं मे गोपाय ॥ **14**

ब्रह्मण आणी स्थः ॥ **15**

*(त्वमग्ने अयाऽसि चत्वारि च) (K4) (14)*

--------------------------------------------------------------------

## 2.5 उपनयनमन्त्राः

### 2.5.1. दण्डादानम्

सुश्रवः सुश्रवसं मा कुरु यथा त्वꣳ सुश्रवः सुश्रवा अस्येवमहꣳ

सुश्रवः सुश्रवा भूयासं ँयथा त्वꣳ सुश्रवो (सुश्रवः सुश्रवो) देवानां

निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम् ॥ 1

### 2.5.2. कुमारवाचनम् उत्थापनम् आदित्योपस्थानम् हस्तग्रहणम् च.

स्मृतं च मेऽस्मृतं च मे तन्म उभयं ँव्रतं 2

निन्दा च मेऽनिन्दा च मे तन्म उभयं ँव्रतꣳ 3

श्रद्धा च मेऽश्रद्धा च मे तन्म उभयं ँव्रतं 4

ँविद्या च मेऽविद्या च मे तन्म उभयं ँव्रतꣳ 5

श्रुतं च मेऽश्रुतं च मे तन्म उभयं ँव्रतꣳ 6

सत्यं च मेऽनृतं च मे तन्म उभयं ँव्रतं 7

तपश्च मेऽतपश्च मे तन्म उभयं ँव्रतं 8

ँव्रतं च मेऽव्रतं च मे तन्म उभयं ँव्रतं 9

ँयद् ब्राह्मणानां ब्रह्मणि व्रतम्,

यदग्नेः सेन्द्रस्य सप्रजापतिकस्य सदेवस्य सदेवराजस्य समनुष्यस्य समनुष्यराजस्य सपितृकस्य सपितृराजस्य सगन्धर्वाफ्सरस्कस्य ।
यन्म आत्मन आत्मनि व्रतं तेनाहꣳ सर्वव्रतो भूयासम् ॥ 10

उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्–पर्जन्यस्य शुष्मेणोदस्था–ममृताꣳ अनु ॥ 11

तच्चक्षुर्–देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीताः स्याम शरदश्शतं ज्योक्च सूर्यं दृशे ॥ 12

यस्मिन् भूतं च भव्यं च सर्वे लोकाः समाहिताः ।
तेन गृह्णामि त्वामहं मह्यं गृह्णामि त्वामहं प्रजापतिना त्वा मह्यं गृह्णाम्यसौ ॥ 13 *(सुश्रवः सुश्रवसमष्टौ) (K5) (8)*

--------------------------------------------------------------------

## 2.6 उपनयनमन्त्राः

### 2.6.1 समिदाधानं

परि त्वाऽग्ने परिमृजाम्यायुषा च धनेन च ।
सुप्रजाः प्रजया भूयास९ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः
सुगृहो गृहैः सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः ॥ 1

अग्नये समिधमाहार्.षं बृहते जातवेदसे यथा त्वमग्ने समिधा
समिद्ध्यस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्
ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥ 2

एधोऽस्येधिषीमहि स्वाहा ॥ 3

समिदसि समेधिषीमहि स्वाहा ॥ 4

तेजोऽसि तेजो मयि धेहि स्वाहा ॥ 5

अपो अद्यान्वचारिष९ रसेन समसृक्ष्महि ।
पयस्वा९ अग्न आगमन्तं मा स९सृज वर्चसा स्वाहा ॥ 6
सं माऽग्ने वर्चसा सृज प्रजया च धनेन च स्वाहा ॥ 7

विद्युन्मे अस्य देवा इन्द्रो विद्याथ् सहर्.षिभिः स्वाहा ( ) ॥ **8**

अग्नये बृहते नाकाय स्वाहा ॥ **9**

द्यावापृथिवीभ्या७ँ स्वाहा ॥ **10**

एषा ते अग्ने समित्तया वर्द्धस्व चाप्यायस्व च तयाऽहं ँवर्धमानो
भूयासमाप्यायमानश्च स्वाहा ॥ **11**

यो माऽग्ने भागिन७ँ सन्तमथाभागं चिकीर्.षत्यभागमग्ने तं कुरु
मामग्ने भागिनं कुरु स्वाहा ॥ **12**

समिधमाधायाग्ने सर्वव्रतो भूयास७ँ स्वाहा ॥ **13**

**2.6.2 संशासनं वासस आदानं च.**

ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा सुषुप्थाः ।
भिक्षाचर्यं चराचार्याधीनो भव ॥ **14**

यस्य ते प्रथमवास्यꣳ हरामस्तं त्वा विश्वे अवन्तु देवाः ।

तन्त्वा भ्रातरः सुवृधो वर्धमानमनु जायन्तां बहवः सुजातम् ॥ 15

*(सह ऋषिभिस्स्वाहा नव च ) (K6) (19)*

(उपनयनमन्त्राः समाप्तः)

---

## 2.7 समावर्तनमन्त्राः

### 2.7.1. समिधादानं

इमꣳ स्तोममर्.हते जातवेदसे रथमिव संमहेमा मनीषया ।

भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव ॥ 1

### 2.7.2. क्षुर कर्म

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।

यद्–देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥ 2

शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः ॥ 3

उष्णेन वायवुदकेनेत्येषः { } । (4 to 11)

**Expansion for – उष्णेन वायवुदकेनेत्येषः**

उष्णेन वायवुदकेनेह्यदितिः केशान् वपतु ॥ 4

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे । ज्योक्च सूर्यं दृशे ॥ 5

येनावपथ् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्. यथाऽसदयमसौ ॥ 6

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् ।
तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥ 7

येन भूयश्चरात्ययं ज्योक्च पश्याति सूर्यम् ।
तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥ 8

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् ।
तेन ते वपाम्यसावायुषा वर्चसा यथा ज्योख्सुमना असाः ॥ 9
यत् क्षुरेण मर्चयता सुपेशसा वप्त्रा वपसि केशान् ।
शुन्धि शिरो माऽस्यायुः प्रमोषीः ॥ 10

उप्त्वाय केशान्. वरुणस्य राज्ञो बृहस्पतिः सविता सोमो अग्निः ।
तेभ्यो निधानं बहुधाऽन्वविन्द–न्नन्तरा द्यावापृथिवी अपः सुवः ॥ **11**

(**Ref - EAK 2.1.1**)

**2.7.3. मेखलाया उपजूहनं**

इदमह–ममुष्या–मुष्यायणस्य पाप्मान–मुपगूहाम्युत्तरोऽसौ
द्विषद्भ्यः ॥ **12**

**2.7.4. स्नान मन्त्राः**

आपो हि ष्ठा मयोभुव इति तिस्रो { } **13 to 15,**

**Expansion for – आपो हि ष्ठा मयोभुव इति तिस्रः**

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥ **13**
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ **14**

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥ **15** (**Ref - TS 4.1.5.1)**

हिरण्यवर्णाः शुचयः पावका इति तिस्रः { } ॥ **16–18**

**Expansion for-हिरण्यवर्णाः शुचयः पावका इति तिस्रः{ }॥ 16–18**

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं ँया गर्भं दधिरे विरूपास्ता न आपः शꣳ स्योना भवन्तु ॥ **16**

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानां ।
मधुश्चुतः शुचयो याः पावकास्ता न आपः शꣳ स्योना भवन्तु ॥ **17**

यासां देवा दिवि कृण्वन्ति भक्षं ँया अन्तरिक्षे बहुधा भवन्ति । याः
पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपः शꣳ स्योना भवन्तु ॥ **18**

(**Ref - TS 5.6.1.1**)

**2.7.5. दन्तधावमम् वासः परिधानम् च.**

अन्नाद्याय व्यूहद्ध्वं दीर्घायुरहमन्नादो भूयासम् । सोमो राजा
ऽयमागमथ्स मे मुखं प्रवेक्ष्यति भगेन सह वर्चसा ( ) ॥ **19**

सोमस्य तनूरसि तनुवं मे पाहि स्वा मा तनूराविश ॥ **20**

**2.7.6. देवताभ्यश्चन्दनप्रदानं.**

नमो ग्रहाय चाभिग्रहाय च 21

नमः शाकजं जभाभ्याम् 22

नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीः ॥ 23

**2.7.7.आत्मनोऽनुलेपः**

अफ्सरः सु यो गन्धो गन्धर्वेषु च यद्यशः ।

दैवो यो मानुषो गन्धः स मा गन्धः सुरभिर् जुषताम् ॥ 24

**2.7.8. उदपात्रे सौवर्णमणिपरिप्लावनम्**

इयमोषधे त्रायमाणा सहमाना सहस्वती ।

सा मा हिरण्यवर्चसं ब्रह्मवर्चसिनं मा करोतु ॥ 25

**2.7.9. ग्रीवास्वाबन्धनम्**

अपाशोऽस्युरो मे मा स७ शारीः शिवो–मोप तिष्ठस्व दीर्घायुत्वाय

शतशारदाय । शत७ शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय ॥ 26

**2.7.10. वाससः परिधानम्**

रेवतीस्त्वा व्यक्ष्णन्नित्येताः { } ॥ 27 to 32

**Expansion for – रेवतीस्त्वा व्यक्ष्णन्**

रेवतीस्त्वा व्यक्ष्णन् कृत्तिकाश्चाकृन्तᳪस्त्वा ।
धियोऽवयन्नवग्ना अवृञ्जन्थ्–सहस्रमन्ताᳪ अभितो अयच्छन्न् ॥ 27

देवीर् देवाय परिधी सवित्रे । महत्तदा–सामभवन्–महित्वनम् ॥ 28

या अकृन्तन्नवयन्. या अतन्वत याश्च देवीरन्तानभितो–ऽददन्त ।
तास्त्वा देवीर्–जरसे सम्ँव्ययन्त्वायुष्मानिदं परिधथ्स्व वासः ॥ 29

परिधत्त धत्त वाससैनᳪ शतायुषं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद्–वास एतथ्सोमाय राज्ञे परिधातवा उ ॥ 30

जरां गच्छासि परिधथ्स्व वासो भवा कृष्टीना–मभिशस्तिपावा ।
शतं च जीव शरदः सुवर्चा रायश्च पोषमुप सम्ँव्ययस्व ॥ 31

परीदं वाँसो अधिधाः स्वस्तये-ऽभूरापीना-मभिशस्तिपावा ।
शतं च जीव शरदः पुरूचीर्.वसूनि चार्यो विभजासि जीवन्न् ॥ 32
(Ref - EAK 2.2.4.)

*(सह वर्चसा नव च) (K7) (19)*

---

## 2.8 समावर्तनमन्त्राः

### 2.8.1. होमः

आयुष्यं वँर्चस्य७ँ सुवीर्य७ँ रायस्पोष-मौद्भिद्यम् ।
इद७ँ हिरण्यं जैत्र्यायाविशतां माम् ॥ 1

उच्चैर्वादि पृतनाजि सत्रासाहं धनञ्जयम् ।
सर्वाः समृद्धीर्. ऋद्धयो हिरण्येऽस्मिन्थ् समाहिताः ॥ 2

शुनमह७ँ हिरण्यस्य पितुरिव नामाग्रभैषम् ।
तं मा हिरण्यवर्चसं पूरुषु प्रियं कुरु ॥ 3

प्रियं मा देवेषु कुरु प्रियं मा ब्रह्मणे कुरु ।
प्रियं वँिश्येषु शूद्रेषु प्रिय७ँ राजसु मा कुरु ॥ 4

या तिरश्ची निपद्यसेऽहं ँविधरणी इति ।
तां त्वा घृतस्य धारया यजे सꣳराधनीमहम् ( ) ॥ 5

सꣳराधन्यै देव्यै स्वाहा 6, प्रसाधन्यै देव्यै स्वाहा ॥ 7

सम्राजं च विराजं चाभिश्रीर्या च नो गृहे ।
लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳसृजामसि ॥ 8

**2.8.2. स्रगबन्धनं**

शुभिके शिर आ रोह शोभयन्ती मुखं मम ।
मुखꣳ हि मम शोभय भूयाꣳसं च भगं कुरु ॥ 9

यामाहरज्जमदग्निः श्रद्धायै कामायान्यै ।
इमां तामपि नह्येऽहं भगेन सह वर्चसा ॥ 10

**2.8.3. आञ्जनमन्त्रः**

यदाञ्जनं त्रैककुदं जातꣳ हिमवत उपरि ।
तेन वामाञ्जे तेजसे वर्चसे भगाय च ॥ 11

***(सꣳराधनीमहम् नव च) (K8) (19)***

## 2.9 समावर्तनमन्त्राः

### 2.9.1. आञ्जनमन्त्रः

मयि पर्वतपूरुषं 1, मयि पर्वतवर्चसं 2, मयि पर्वतभेषजं 3,

मयि पर्वतायुषम् ॥ 4

### 2.9.2. अदर्शवेक्षण उपानद्ग्रहण दण्डादान् दिगुपस्थान नक्षत्रचन्द्रोपस्थानानि.

यन्मे वर्चः परागतमात्मान–मुपतिष्ठति ।

इदं तत्पुनराददे दीर्घायुत्वाय वर्चसे ॥ 5

प्रतिष्ठे स्थो देवतानां मा मा सन्ताप्तम् ॥ 6

प्रजापतेः शरणमसि ब्रह्मणः छदिर्–विश्वजनस्य छायाऽसि सर्वतो मा पाहि ॥ 7

देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्यामाददे द्विषतो वधायेन्द्रस्य वज्रोऽसि वार्त्रघ्नः शर्म मे भव यत्पापं तन्निवारय ॥ 8

देवीः षडुर्वीर् इत्येषा । (9–10) { }

**Expansion for - देवीः षडुर्वीर् इत्येषा .**

देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयद्ध्वं ॥ 9

माहास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ 10

**Ref - –TS 4.7.14.2**

## समावर्तनमन्त्राः समाप्तः

---------------------------------------------------------------------

**2.9.3. मधुपर्कमन्त्राः**

राष्ट्रभृदस्या-चार्यासन्दी मा त्वद्योष९ 11

राष्ट्रभृदसि सम्राडासन्दी मा त्वद्योष९ 12

राष्ट्रभृदस्यधिपत्न्यासन्दी मा त्वद्योषम् ॥ 13

आपः पादावनेजनीर् द्विषन्तं नाशयन्तु मे ।
अस्मिन् कुले ब्रह्मवर्चस्यसानि ( ) ॥ 14

मयि महो मयि यशो मयीन्द्रियं ँवीर्यम् ॥ 15

आ मा ऽऽगन्. यशसा वर्चसा स९सृज पयसा तेजसा च ।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम् ॥ 16 क

विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विराज ॥ 17

समुद्रं ँवः प्रहिणोमि स्वां ँयोनिमपिगच्छत ।
अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥ 18

*(असानि षट्च) (K9) (16)*

## 2.10 मधुपर्क मन्त्राः

### 2.10.1. मधुपर्क मन्त्राः

त्रय्यै विद्यायै यशोऽसि यशसो यशोसि ब्रह्मणो दीप्तिरसि ।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम् ॥ 1

आ मा गन्नित्येषा { } ॥ 2

**Expansion for – आ मा गन्**

आ मा ऽऽगन्. यशसा वर्चसा सꣳसृज पयसा तेजसा च ।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम् ॥ 2 (Ref - EAK 2.9.16)

अमृतोपस्तरणमस्य3 मृतापिधानमसि ॥ 4

यन्मधुनो मधव्यं परममन्नाद्यं ँवीर्यम् । तेनाहं मधुनो मधव्येन
परमेणान्नाद्येन वीर्येण परमोऽन्नादो मधव्योऽसानि ॥ 5

गौरस्यपहतपाप्माऽप पाप्मानं जहि मम चामुष्य च ।
अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः ॥ 6

(अनष्ट) अरिष्टमस्माकं कृण्वन् ब्राह्मणो ब्राह्मणेभ्यः ॥ 7

यज्ञो वर्द्धतां यँज्ञस्य वृद्धिमनु वर्द्धापचितिरस्य–पचितं

मा कुर्वपचितोऽहं मनुष्येषु भूयासम् ( ) ॥ 8

गौर्–धेनुभव्या 9 , माता रुद्राणां दुहिता वसूनाऽ स्वसाऽऽदित्याना–

ममृतस्य नाभिः (10) ।

प्रणु वोचं चिकितुषे जनाय मा गामनागामदितिं वँधिष्ट ॥ 10

पिबतूदकं तृणान्यत्तु । ओमुथ्सृजत ॥ 11

भूतम् (सुभूतम्) ॥ 12

सा विराट् ॥ 13

तन्मा क्षायि तस्य तेऽशीय तन्म ऊर्जं धाः ॥

ओं कल्पयत ॥ 14

*(भूयासमष्टौ च) (K10) (18)*

------------------------------------------------------------------

## 2.11 सीमन्तोन्नयनं

### 2.11.1. होममन्त्राः

धाता ददातु नो रयिमिति चतस्रो 1 to 4 { }

यस्त्वा हृदा कीरिणेति चतस्रः । 5 to 8 { }

भूर्भुवस्सुवो 9, राकामहं 10 { }, ँयास्ते राके ॥ 11 { }

**Expansion for – धाता ददातु नो रयिमिति**

धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥ 1

धाता प्रजाया उत राय ईशे धातेदं ँविश्वं भुवनं जजान ।
धाता पुत्रं ँयजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम ॥ 2

धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां ।
वयं देवस्य धीमहि सुमति७ँ सत्यराधसः ॥ 3

धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे । तस्मै देवा
अमृताः सम्ँव्ययन्तां ँविश्वे देवासो अदितिः सजोषाः ॥ 4

**Ref - TS 3.3.11.2**

**Expansion for – यस्त्वा हृदा कीरिणा**

यस्त्वा हृदा कीरिणा मन्यमानो ऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥ 5

यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ।
अश्विनꣳ स पुत्रिणं वीरवन्तं गोमन्तꣳ रयिं नशते स्वस्ति ॥ 6

त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः । न त्वामिन्द्रातिरिच्यते ॥ 7

उक्थ उक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानꣳ सुतासः ।
यदीꣳ सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ 8

**Ref - TS 1.4.46.1**

Expansion for – राकामहं , ँयास्ते राके

राकामहꣳ सुहवाꣳ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यं ॥ 10

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे रराणा ॥ 11

**Ref - TS 3.3.11.5**

### 2.11.2 वीणागानमन्त्रौ

यौगन्धरिरेव नो राजेति साल्वीरवादिषुः ।
विवृत्तचक्रा आसीनास्तीरेण यमुने तव ॥ 12

सोम एव नो राजेत्याहुर् ब्राह्मणीः प्रजाः ।
विवृत्तचक्रा आसीनास्तीरेणासौ तव ॥ 13

### 2.11.3 पुंसवनं

पुꣳसुवनमसि ॥ 14

### 2.11.4 क्षिप्रं सवनं

आभिष्ट्वाहं दशभि–रभिमृशामि दशमास्याय सूतवे ॥ 15
यथैव सोमः पवते यथा समुद्र एजति ।
एवं ते गर्भ एजतु सह जरायुणा निष्क्रम्य प्रतितिष्ठत्वायुषि
ब्रह्मवर्चसि यशसि वीर्येऽन्नाद्ये ( ) ॥ 16

दश मासां च शयानो धात्रा हि तथा कृतम् ।
ऐतु गर्भो अक्षितो जीवो जीवन्त्याः ॥ **17**

आयमनीर्यमयत गर्भमापो देवीः सरस्वतीः ।
ऐतु गर्भो अक्षितो जीवो जीवन्त्याः ॥ **18**

**2.11.5 जरायुणाऽवाक्पतने यजुर्भ्यामवोक्षणं**

तिलदे ऽवपद्यस्व न माꣳसमसि नोदलम् ।
स्थविन्त्र्यवपद्यस्व न माꣳसेषु न स्नावसु न बद्धमसि मज्जसु ॥ **19**

निरैतु पृश्नि शेवलꣳ शुने जराय्वत्तवे ॥ **20**

(जातकर्म मन्त्राः प्रारंभः)

**जातकर्म 2.11.6 full, 2.12 full , 2.13 part**

दिवस्परीत्येषोऽनुवाकः । **21–31** { }

**Expansion for – दिवस्परि**

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ **21**

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्–विद्मा तमुथ्सं यँत आजगन्थ ॥ 22

समुद्रे त्वा नृमणा अफ्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन्न् ।
तृतीये त्वा रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन्न् ॥ 23

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्–वीरुधः समञ्जन्न् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ 24

उशिक् पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो निधायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्या–मिनक्षत् ॥ 25

विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायन् जना यदग्निमयजन्त पञ्च ॥ 26

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसोः सूनुः सहसो अफ्सु राजा वि भात्यग्र उषसामिधानः ॥ 27

यस्ते अद्य कृणवद्–भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरां ँवस्यो अच्छाभि द्युम्नं देवभक्तं ँयविष्ठ ॥ 28

आ तं भज सौश्रवसेष्वग्न उक्थ–उक्थ आभज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ 29

त्वामग्ने यजमाना अनु द्यून् विश्वा वसूनि दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥ 30
दृशानो रुक्म उर्व्या व्यद्यौद्–दुर्मर्.षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्–वयोभिर्यदे नं द्यौरजनयथ् सुरेताः ॥ 31

(**Ref - TS 4.2.2.1**)

अस्मिन्नह७् सहस्रं पुष्याम्येधमानस्स्वे वशे ॥ 32

अङ्गादङ्गाथ्सं भवसि हृदयादधि जायसे ( ) ।
आत्मा वै पुत्रनामाऽसि स जीव शरदश्शतम् ॥ 33

*(अन्नाद्ये – जायस एकं च ) (K11)* (21)

-----------------------------------------------------------------

## 2.12 जातकर्म

### 2.12.1 मूधन्यवघ्रानम्

अश्मा भव परशुर् भव हिरण्यमस्तृतं भव ।

पशूनां त्वा हिङ्कारेणाभिजिघ्राम्यसौ ॥ 1

### 2.12.2 दक्षिणे कर्णे जपः

मेधां ते देवः सविता मेधां देवी सरस्वती ।

मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ 2

### 2.12.3 प्राशनमन्त्राः

त्वयि मेधां त्वयि प्रजां त्वय्यग्निस्तेजो दधातु 3

त्वयि मेधां त्वयि प्रजां त्वयीन्द्र इन्द्रियं दधातु 4

त्वयि मेधां त्वयि प्रजां त्वयि सूर्यो भ्राजो दधातु ॥ 5

### 2.12.4 स्नापनमन्त्राः

क्षेत्रियै त्वा निर्.ऋत्यै त्वा द्रुहो मुञ्चामि वरुणस्य पाशात् ।

अनागसं ब्रह्मणे त्वा करोमि शिवे ते द्यावापृथिवी उभे इमे ॥ 6

शं ते अग्निः सहाद्भिरस्तु शं द्यावापृथिवी सहौषधीभिः ।

शमन्तरिक्षꣳ सह वातेन ते शं ते चतस्रः प्रदिशो भवन्तु ॥ 7

या दैवीश्चतस्रः प्रदिशो वातपत्नीरभि सूर्यो विचष्टे ( ) ।
तासां त्वा जरस आदधामि प्र यक्ष्म एतु निर्.ऋतिं पराचैः ॥ 8

अमोचि यक्ष्माद्-दुरितादवर्त्यै द्रुहः पाशान् निर्.ऋत्यै चोदमोचि ।
अहा अवर्ति-मविदथ्-स्योनमप्यभूद्-भद्रे सुकृतस्य लोके ॥ 9

सूर्यमृतं तमसो ग्राह्या यद्-देवा अमुञ्चन्-नसृजन्-व्येनसः ।
एवमहमिमं क्षेत्रिया-ज्जामिशं साद् द्रुहो मुञ्चामि वरुणस्य
पाशात् ॥ 10

### 2.12.5 पृषदाज्य प्राशनम्

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोꣳ स्वाहा ॥ 11

*(विचष्टे षट्च) (K12) (16)*

---

## 2.13 जातकर्म

### 2.13.1 मातुरङ्के कुमारमादधाति

मा ते कुमारं रक्षो वधीन्मा धेनुरत्यासारिणी ।
प्रिया धनस्य भूया एधमाना स्वे गृहे ॥ 1

**2.13.2 स्तनं धापयति**

अयं कुमारो जरां धयतु दीर्घमायुः ।

यस्मै त्वꣳ स्तन प्रप्यायायुर्–वर्चो यशो बलम् ॥ 2

**2.13.3 पृथिव्यभिमर्शनं**

यद्–भूमेर्. हृदयं दिवि चन्द्रमसि श्रितम् ।

तदुर्वि पश्यं माऽहं पौत्रमघꣳ रुदम् ॥ 3

यत्ते सुसीमे हृदयं ँवेदाहं तत् प्रजापतौ ।

वेदाम तस्य ते वयं माऽहं पौत्रमघꣳ रुदम् ॥ 4

**2.13.4 कुमाराभिमर्शनं**

नामयति न रुदति यत्र वयं ँवदामसि यत्र चाभिमृशामसि ॥ 5

**2.13.5 शिरस्त उदकुम्भनिधानं**

आपः सुप्तेषु जाग्रत रक्षाꣳसि निरितो नुदद्ध्वम् ( ) ॥ 6

**2.13.6 फलीकरणमिश्रसर्षपहोमः**

अयं कलिं पतयन्तꣳ श्वानमिवोद्वृद्धम् ।

अजां ँवाशितामिव मरुतः पर्याद्ध्वꣳ स्वाहा ॥ 7

शण्डेरथः शण्डिकेर उलूखलः । च्यवनो नश्यतादितः स्वाहा ॥ 8

अयः शण्डो मर्क उपवीर उलूखलः । च्यवनो नश्यतादितः स्वाहा ॥ 9

केशिनीः श्वलोमिनीः खजापोऽजोपकाशिनीः ।

अपेत नश्यतादितः स्वाहा ॥ 10

मिश्रवाससः कौबेरका रक्षोराजेन प्रेषिताः ।

ग्रामꣳ सजानयो गच्छन्तीच्छन्तो–ऽपरिदाकृतान्थ् स्वाहा ( ) ॥ 11

एतान्–घ्नतैतान्–गृह्णीतेत्ययं ब्रह्मणस्पुत्रः ।

तानग्निः पर्यसरत्–तानिन्द्रस्तान्–बृहस्पतिः ।

तानहं वेँद ब्राह्मणः प्रमृशतः कूटदन्तान्. विकेशान्

ँलंबनस्तनान्थ् स्वाहा ॥ 12

***(निरितो नुद्ध्वꣳ – स्वाहा त्रीणि च ) (K13) (23)***

---------------------------------------------------------------------

## 2.14 जातकर्म

### 2.14.1 फलीकरणमिश्रसर्षपहोमः

नक्तञ्चारिण उरस्पेशा-ञ्छूलहस्तान् कपालपान् ।
पूर्व एषां पितेत्युच्चैःश्राव्यकर्णकः ।
माता जघन्या सर्पति ग्रामे विधुरमिच्छन्ती स्वाहा ॥ 1

निशीथचारिणी स्वसा सन्धिना प्रेक्षते कुलम् ।
या स्वपन्तं बोधयति यस्यै विजातायां मनः ।
तासां त्वं कृष्णवर्त्मने क्लोमानꣳ हृदयं ँयकृत् ।
अग्ने अक्षीणि निर्दह स्वाहा ॥ 2

## प्रवासादेत्य कार्यं

### 2.14.2 पुत्रस्याभिमन्त्रणं

अङ्गादङ्गाथ् संभवसि हृदयादधि जायसे ।
वेदो वै पुत्रनामाऽसि सजीव शरदश्शतम् ॥ 3

## 2.14.3 मूर्धन्यवघ्राणं

अश्मा भवेत्येषा ( ) ॥ 4 { }

Expansion for – अश्मा भवेत्येषा

अश्मा भव परशुर् भव हिरण्यमस्तृतं भव ।

पशूनां त्वा हिङ्कारेणाभिजिघ्राम्यसौ ॥ 1 **Ref EAK 2.12.1**

## 2.14.4 दक्षिणे कर्णे जपः

अग्निरायुष्मानिति पञ्च । 5 to 9 { }

Expansion for – अग्निरायुष्मानिति पञ्च.

अग्निरायुष्मान्थ्स वनस्पतिभिरायुष्मान् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं

करोमि ॥ 5

सोम आयुष्मान्थ्स ओषधीभिरायुष्मान् तेनत्वाऽऽयुषाऽऽयुष्मन्तं

करोमि ॥ 6

यज्ञ आयुष्मान्थ्स दक्षिणाभिरायुष्मान् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं

करोमि ॥ 7

ब्रह्मायुष्मत् तद् ब्राह्मणैरायुष्मत् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ॥ 8

देवा आयुष्मन्तस्ते ऽमृतेनायुष्मन्तस्तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ॥ 9 (Ref - TS 2.3.10.3)

**2.14.5 कुमार्या अभिमन्त्रणम्**

सर्वस्मादात्मनः संभूताऽसि सा जीव शरदश्शतम् ॥ 10

**2.14.6 अन्नप्राशन मन्त्राः**

भूरपां त्वौषधीनाꣳ रसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयः सन्त्वसौ ॥ 11

भुवोऽपाꣳ 12, सुवरपां 13,

भूर्भुवस्सुवरपां त्वौषधीनाꣳ रसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयः सन्त्वसौ ॥ 14

### 2.14.7 चौळ मन्त्राः

उष्णेन वायवुदकेनेत्येषः ॥ 15 { }

| |
|---|
| Expansion for - उष्णेन वायवुदकेनेत्येषः |
| **(Same as EAK 2.7.2. above )** |

## जातकर्म मन्त्राः समाप्तः

*( एषा चत्वारि च ) (K14) (14)*

---------------------------------------------------------------------

## 2.15 गृहनिर्माण प्रवेशौ

### 2.15.1 गृहनिर्माणप्रवेशौ

यद्-भूमेः क्रूरं तदितो हरामि पराचीं निर्.ऋतिं निर्वाहयामि ।

इद७ श्रेयोऽवसानमागन्म देवा गोमदश्वावदिदमस्तु प्र भूम ॥ 1

स्योना पृथिवि भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥ 2

इहैव तिष्ठ निमिता तिल्वला स्यादिरावती ।

मद्ध्ये ताल्प्यस्य तिष्ठान्मा त्वा प्रापन्नघायवः ॥ 3

आ त्वा कुमारस्तरुण आ वथ्सो जगता सह ।

आ त्वा परिस्रुतः कुंभा आ दध्नः कलशीरयन्न् ॥ 4

ऋतेन स्थूणावधिरोह वꣳशोग्रो विराजन्नपसेध शत्रून् ॥ 5

ब्रह्म च ते क्षत्रं च पूर्वे स्थूणे अभिरक्षतु ( ) ॥ 6

यज्ञश्च दक्षिणाश्च दक्षिणे ॥ 7

इषश्चोर्जश्चापरे 8 , मित्रश्च वरुणश्चोत्तरे 9,

धर्मस्ते स्थूणा राजः 10, श्रीस्ते स्तूपः ॥ 11

उद्धियमाण उद्धर पाप्मनो मा यदविद्वान्. यच्च विद्वाꣳश्चकार ।

अह्ना यदेनः कृतमस्ति पापꣳ रात्र्या यदेनः कृतमस्ति पापꣳ

सर्वस्मान् मोद्धृतो मुञ्च तस्मात् ॥ 12

इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहꣳ सुमनसः प्रपद्ये ॥ 13

अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै

तयाऽनन्तं काममहं जयानि प्रजापतिर्यं प्रथमो जिगायाग्नि–

मग्नौ स्वाहा ॥ 14

अन्नपत इत्येषा ॥ 15 { }

**Expansion for – अन्नपत इत्येषा**

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं

नो धेहि द्विपदे चतुष्पदे ॥ 15 (Ref - TS 4.2.3.1)

अरिष्टा अस्माकं वीराः सन्तु मा परासेचि मे धनम् ॥ 16

भूमिर्–भूमिमगान्माता मातरमप्यगात् ।

भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् ( ) ॥ 17

वास्तोष्पत इति द्वे । 18 to 19 { }

**Expansion for - वास्तोष्पत इति द्वे**

वास्तोष्पते प्रति जानीह्यस्मान्थ् स्वावेशो अनमीवो भवानः ।
यत् त्वेमहे प्रति तन्नो जुषस्व शन्न ऐधि द्विपदे शञ्चतुष्पदे ॥ 18

वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ।
आवः क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदानः ॥ 19

**Ref - TS 3.4.10.1**

वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ॥ 20

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।
सखा सुशेव एधि नः ॥ 21

शिवꣳ शिवम् ॥ 22

*(अभि रक्षतु – भिद्यताꣳ षट्च ) (K15) (26)*

-----------------------------------------------------------------------

## 2.16 स्वग्रगृहीतस्याभिमन्त्रणम्

### 2.16.1 स्वग्रगृहीतस्याभिमन्त्रणम्

कूर्कुरः सुकूर्कुरः कूर्कुरो वालबन्धनः ।
उपरिष्टाद्–यदेजाय तृतीयस्या इतो दिवः ॥ 1

औलब इत्तमुपाह्वयथार्जीञ्छयामः शबलः ।
अधोराम उलुंबलः सारमेयो ह धावति समुद्र–मवचाकशत् ॥ 2

बिभ्रन्निष्कं च रुक्मं च शुनामग्रꣳ सुबीरिणः ।
सुबीरिण सृज सृज शुनक सृजैकव्रात्य सृजच्छत् ॥ 3

तथ्सत्यं ँयत्त्वेन्द्रोऽब्रवीद्गाः स्पाशयस्वेति तास्त्वꣳ स्पाशयित्वा
ऽऽगच्छस्तं त्वाऽब्रवीदविद हा(3) इत्यविदꣳ हीति वरं ँवृणीष्वेति

कुमारमेवाहं ँवरं ँवृण इत्यब्रवीर् विगृह्य बाहू प्लवसे द्यामव
चाकशत् ॥ 4

बिभ्रन्निष्कं च रुक्मं च शुनामग्रꣳ सुबीरिणः ।
सुबीरिण सृज सृज शुनक सृजैकव्रात्य सृजच्छत् ॥ 5

तथ्सत्यं ँयत्ते सरमा माता लोहितः पिता ( ) ।
अमी एके सरस्यका अवधावत तृतीयस्या इतो दिवः ॥ 6

तेकश्च ससरम तण्डश्च तूलश्च वितूलश्चार्जुनश्च लोहितश्च ।
दुला ह नाम वो माता मन्थाकको ह वः पिता ।
सन्तक्षा हन्ति चक्री वो न सीसरीदत ॥ 7

छदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर ।
समश्वा वृषणः पदो न सीसरीदत ॥ 8

छदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर ।
श्वानमिच्छवा ऽदन्न पुरुषञ्छत् ॥ 9

**2.16.2 शङ्खग्रहगृहीतस्याभि–मन्त्रणम्**

एते ते प्रतिदृश्येते समानवसने उभे ।
ते अह८ सारयेण मुसलेना–वहन्म्युलूखले ( ) ॥ 10
हतश्शङ्खो हतश्शङ्खपिता हतश्शङ्खकुतुर्वकः ।
अप्येषा७ स्थपतिर्. हतः ॥ 11

ऋषिर्बोधः प्रबोधः स्वप्नो मातरिश्वा ।
ते ते प्राणान्थ् स्परिष्यन्ति मा भैषीर्न मरिष्यसि ॥ **12**

**(सर्पबलिः मन्त्राः प्रारंभः)**

**2.16.3 सर्पबलिः**

जग्धो मशको जग्धा वितृष्टिर्जग्धो व्यद्ध्वरः स्वाहा **13**

जग्धो व्यद्ध्वरो जग्धो मशको जग्धा वितृष्टिः स्वाहा **14**

जग्धा वितृष्टिर्जग्धो व्यद्ध्वरो जग्धो मशकः स्वाहा ॥ **15**

*(पिता–ऽवहन्म्युलूखले –पञ्च च ) (K16) (25)*

--------------------------------------------------------------------

## 2.17 सर्पबलिः

**2.17.1 सर्पबलिः**

इन्द्र जहि दन्दशूकं पक्षिणं ँयस्सरीसृपः ।
दंक्ष्यन्तं च दशन्तं च सर्वा॑स्तानिन्द्र जंभय स्वाहा ॥ **1**

अफ्सु जात सरेवृद्ध देवानामपि हस्त्य ।
त्वमग्न इन्द्र प्रेषितः स नो मा हिꣳसीः स्वाहा ॥ **2**

त्राणमसि परित्राणमसि परिधिरसि ।

अन्नेन मनुष्या॑ स्नायसे तृणैः पशून् गर्तेन सर्पान्. यज्ञेन देवान्थ्–
स्वधया पितृन्थ्–स्वाहा ॥ 3

तथ्सत्यं ँयत्तेऽमावास्यायां च पौर्णमास्यां च विषबलि॑ हरन्ति सर्व
उदरसर्पिणः ।

तत्ते प्रेरते त्वयि सम्ँविशन्ति त्वयि नः सतस्त्वयि
सद्भ्यो वर्.षाभ्यो नः परिदेहि ॥ 4

नमो अस्तु सर्पेभ्य इति तिस्रः । (5–7) { }

**Expansion for – नमो अस्तु सर्पेभ्यः**

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ 5
येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ॥ 6
या इषवो यातुधानानां ँये वा वनस्पती॑रनु ।
ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ 7 (Ref -TS 4.2.8.3)

नमो अस्तु सर्पेभ्यो ये पार्थिवा य आन्तरिक्ष्या ये दिव्या ये दिश्याः ( ) । तेभ्य इमं बलि॒ꣳ हरिष्यामि तेभ्य इमं बलिमहार्.षम् ॥ 8

तक्षक वैशालेय धृतराष्ट्रैरावतस्ते जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नः परिदेहि ॥ 9 धृतराष्ट्रैरावत तक्षकस्ते वैशालेयो जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्.षाभ्यो नः परिदेहि ॥ 10

अहि॒ꣳसातिबलस्ते जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्.षाभ्यो नः परिदेहि ॥ 11

अतिबलाहि॒ꣳसस्ते जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्.षाभ्यो नः परिदेहि ॥ 12

ये दन्दशूकाः पार्थिवास्ता॒ꣴस्त्वमितः परो गव्यूतिं निवेशय ।
सन्ति वै नः शफिनः सन्ति दण्डिनस्ते वो नेद्धिनसान्
न्येद् यूयमस्मान्. हिनसात ॥ 13

समीची नामासि प्राची (14–19) { }

दिग्घेतयो नाम स्थेति द्वादश पर्यायाः ॥ 20−25 { }

**Expansion for – समीची नामासि प्राची**

समीची नामासि प्राची दिक्तस्यास्ते ऽग्निरधिपति रसितो रक्षिता
यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां
ते यं द्विष्मो यश्च नो द्वेष्टि तं वाँ जंभे दधामि ॥ 14

ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकू
रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं
द्विष्मो यश्च नो द्वेष्टि तं ँवा जंभे दधामि ॥ 15

प्राची नामासि प्रतीची दिक्तस्यास्ते सोमोऽधिपति स्स्वजो रक्षिता
यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च
नो द्वेष्टि तं ँवा जंभे दधामि ॥ 16

अवस्थावा नामा–स्युदीची दिक्तस्यास्ते वरुणोऽधिपति–स्तिरश्च राजी रक्षिता यश्चाधिपति–र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवा जंभे दधामि ॥ **17**

अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पति–रधिपति श्श्वित्रो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवा जंभे दधामि ॥ **18**

वशिनी नामासीयं दिक्तस्यास्ते यमोऽधिपतिः कल्माष ग्रीवो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वाँ जंभे दधामि ॥ **19** (**Ref - TS 5.5.10.1**)

**Expansion for – दिग्घेतयो नाम स्थेति द्वादश पर्यायाः**

हेतयो नामस्थ तेषां ँवः पुरो गृहा अग्निर्व इषव–स्सलिलो वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवो जंभे दधामि ॥ **20**

निलिंपा नामस्थ तेषां ँवो दक्षिणा गृहाः पितरो व इषव–स्सगरो
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं
ँवो जंभे दधामि ॥ 21

वज्रिणो नामस्थ तेषां ँवः पश्चाद्–गृहा स्स्वप्नो व इषवो गह्वरो
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं
ँवो जंभे दधामि ॥ 22

अवस्था वा नो नामस्थ तेषां ँव उत्तराद् गृहा आपो व इषव
स्समुद्रो वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो
द्वेष्टि तं ँवो जंभे दधामि ॥ 23

अधिपतयो नामस्थ तेषां ँव उपरि गृहा वर्.षं व इषवोऽवस्वान्.
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं
ँवो जंभे दधामि ॥ 24

क्रव्या नामस्थ पार्थिवा–स्तेषां ँव इह गृहा अन्नं व इषवो निमिषो वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवो जंभे दधामि ॥ **25** (**Ref - TS 5.5.10.3**)

अपश्वेत पदा जहि पूर्वेण चापरेण च ।
सप्त च मानुषीरिमास्तिस्रश्च राजबन्धवीः ( ) ॥ **26**
न वै श्वेतस्याद्ध्याचारे ऽहिर् जघान कञ्चन ।
श्वेताय वैदर्वाय नमो नमः श्वेताय वैदर्वाय ॥ **27**

***(दिश्या – राजबन्धवीर् –द्वे च) (K17) (22)***

## 2.18 आग्रयणाद्यः

### 2.18.1. आग्रयणं

परमेष्ठ्.यसि परमां मा७ श्रियं गमय **1** ,

### 2.18.2 हेमन्तप्रत्यवरोहणं.

प्रत्यवरूढो नो हेमन्तः ॥ **2**

प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे **3** प्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥ **4**

प्रतिप्रजायां प्रतितिष्ठामि भव्ये ॥ **5**

इह धृतिरिह विधृति 6 रिह रन्तिरिह रमतिः ॥ 7

स्योना पृथिवि 8 { }, बडित्था पर्वतानामिति द्वे ॥ 9 { }

**Expansion for – स्योना पृथिवि**

स्योना पृथिवि भवाऽनृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ॥ 8 (**Ref - EAK 2.15.1**)

**Expansion for – बडित्था पर्वतानामिति द्वे**

बडित्था पर्वतानां खिद्रं बिभर्.षि पृथिवि ।
प्र या भूमि प्रवत्वति मह्ना जिनोषि महिनि ॥ (**Ref -TS 2.2.12.2**)

**2.18.3 ईशान बलिः**

आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः ।
वाताजिरैर् मम हव्याय शर्वो 10

पस्पृशतु मीढ्वान् मीढुषे स्वाहो 11

पस्पृशतु मीढुषी मीढुष्यै स्वाहा 12

जयन्तोपस्पृश जयन्ताय स्वाहा 13

भवाय देवाय स्वाहा 14

शर्वाय देवाय स्वाहे 15

ईशानाय देवाय स्वाहा 16

पशुपतये देवाय स्वाहा 17

रुद्राय देवाय स्वाहो 18

उग्राय देवाय स्वाहा 19

भीमाय देवाय स्वाहा 20

महते देवाय स्वाहा 21

भवस्य देवस्य पत्न्यै स्वाहा 22

शर्वस्य देवस्य पत्न्यै स्वाहे 23

ईशानस्य देवस्य पत्न्यै स्वाहा 24

पशुपतेर् देवस्य पत्न्यै स्वाहा 25

रुद्रस्य देवस्य पत्न्यै स्वाहो 26

उग्रस्य देवस्य पत्न्यै स्वाहा 27

भीमस्य देवस्य पत्न्यै स्वाहा 28

महतो देवस्य पत्न्यै स्वाहा 29

जयन्ताय स्वाहा 30

ऽग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानाᳬ समर्द्धयित्रे स्वाहा ॥ 31

स्वस्ति नः पूर्णमुखः परिक्रामतु 32

गृहपोपस्पृश गृहपाय स्वाहा 33

गृहप्युपस्पृश गृहप्यै स्वाहा 34

घोषिण उपस्पृशत घोषिभ्यः स्वाहा 35

श्वासिन उपस्पृशत श्वासिभ्यः स्वाहा 36

विचिन्वन्त उपस्पृशत विचिन्वद्भ्यः स्वाहा 37

प्रपुन्वन्त उपस्पृशत प्रपुन्वद्भ्यः स्वाहा 38

समश्नन्त उपस्पृशत समश्नद्भ्यः स्वाहा 39

देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा 40

या आख्याता याश्चानाख्याता देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा 41

द्वारापोपस्पृश द्वारापाय स्वाहा **42**

द्वाराप्युपस्पृश द्वाराप्यै स्वाहा **43**

ऽन्वासारिण उपस्पृशतान्वासारिभ्यः स्वाहा **44**

निषङ्गिन्नुपस्पृश निषङ्गिणे स्वाहा **45**

नमो निषङ्गिण इषुधिमते **46**

क्षेत्रस्य पतिना वयमिति द्वे ॥ **47 – 48**{ }

**Expansion for – क्षेत्रस्य पतिना वयमिति द्वे**

क्षेत्रस्य पतिना वयꣳ हितेनेव जयामसि ।
गामश्वं पोषयित्वा स नो मृडातीदृशे ॥ **47**

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ।

(**Ref - TS 1.1.14.2**)

*(परमेष्ठ्यसि परमामष्टौ ) (K18) (8)*

---

## 2.19 मासिश्राद्धं

### 2.19.1 मासिश्राद्धं

यन्मे माता प्रलुलोभ चरत्यननुव्रता ।
तन्मे रेतः पिता वृङ्क्तां मा ऽऽभुरन्यो ऽवपद्यता-ममुष्मै स्वाहा ॥ 1

यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः परि तस्थुषीः ।
अद्भिर्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधेऽमुष्मै स्वाहा ॥ 2

यन्मे पितामही प्रलुलोभ चरत्यननुव्रता ।
तन्मे रेतः पितामहो वृङ्क्तां मा ऽऽभुरन्यो ऽवपद्यता-ममुष्मै स्वाहा ॥ 3

अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या ।
आभिर्दिग्भि-रनन्ताभि-रन्तरन्यं पितामहाद्-दधेऽमुष्मै स्वाहा ॥ 4

यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः प्रपितामहो वृङ्क्तां
मा ऽऽभुरन्यो ऽवपद्यता-ममुष्मै स्वाहा ( ) ॥ 5

अन्तर्दध ऋतुभिरहोरात्रैस्स (श्च) सन्धिभिः ।
अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्-दधेऽमुष्मै स्वाहा ॥ 6

ये चेह पितरो ये च नेह याꣳश्च विद्म याꣳ उ च न प्र विद्म ।
अग्ने तान्. वेत्थ यदि ते जातवेदस्तया प्रत्तꣳ स्वधया मदन्तु स्वाहा ॥ 7

स्वाहा पित्रे ॥ 8

पित्रे स्वाहा ॥ 9

स्वाहा पित्रे ॥ 10

पित्रे स्वाहा ॥ 11

स्वधा स्वाहा ॥ 12

अग्नये कव्यवाहनाय स्वधा स्वाहा ( ) ॥ 13

एष ते तत मधुमाꣳ ऊर्मिः सरस्वान्. यावानग्निश्च पृथिवी
च तावत्यस्य मात्रा तावतीन्त एतां मात्रां ददामि
यथाऽग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रेऽक्षितोनुपदस्तः स्वधा भव तां
त्वꣳ स्वधां तै स्सहोपजीवर्चस्ते महि 14,

मैष ते पितामह मधुमा॑ ऊर्मिः सरस्वान्. यावान्. वायुश्चान्तरिक्षञ्च
तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथा वायुरक्षितो
ऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्तः स्वधा भव तां त्व॑
स्वधां तैस्सहोपजीव सामानि ते महिमैष 15,

ते प्रपितामह मधुमा॑ ऊर्मिः सरस्वान्. यावानादित्यश्च द्यौश्च
तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽऽदित्योऽक्षि
तोऽनुपदस्त एवं मह्यं प्रपितामहायाऽक्षितोनुपदस्तः स्वधा भव तां
त्व॑ स्वधां तैस्सहोपजीव यजू॑षि ते महिमा ॥ **16**

***(अमुष्मै स्वाहा – स्वधा स्वाहै – कम् च) (K19) (21)***

------------------------------------------------------------------

## 2.20 मासिश्राद्धं

### 2.20.1 मासिश्राद्धं

पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्-जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् ँल्लोके ॥ 1

मार्जयन्तां मम पितरो 2 , मार्जयन्तां मम पितामहा 3,

मार्जयन्तां मम प्रपितामहा 4, मार्जयन्तां मम मातरो 5,

मार्जयन्तां मम पितामह्यो 6, मार्जयन्तां मम प्रपितामह्यः ॥ 7

एतत् ते ततासौ ये च त्वामन्वे 8,

तत् ते पितामहासौ ये च त्वामन्वे 9,

तत् ते प्रपितामहासौ ये च त्वामन्वे 10,

तत् ते मातरसौ याश्च त्वा मन्वे 11,

तत् ते पितामह्यसौ याश्च त्वामन्वे 12,

तत् ते प्रपितामह्यसौ याश्च त्वामनु ॥ 13

मार्जयन्तां मम पितर इत्येते ॥ 14-19

ये च वोऽत्र ये चास्मास्वाशꣳसन्ते 20,

याश्च वोऽत्र याश्चास्मास्वाश॒ंसन्ते 21, ते च वहन्तां 22,

ताश्च वहन्तां 23, तृप्यन्तु भवन्त 24, स्तृप्यन्तु भवत्य 25,

स्तृप्यत तृप्यत तृप्यत ॥ 26

पुत्रान् पौत्रानभि तर्पयन्तीरापो मधुमतीरिमाः ।

स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयाँ स्तर्पयन्तु ॥ 27

तृप्यत तृप्यत तृप्यत ॥ 28

प्राणे निविष्टोऽमृतं जुहोमि ब्रह्मणि म आत्माऽमृतत्वाय ॥ 29

**(मासि श्राद्ध मन्त्राः समाप्तः)**

---------------------------------------------------------------------------

## ( अष्टकाद्य मन्त्राः प्रारंभः)

### 2.20.2 अष्टका

यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् ( ) ।

सम्ँवथ्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ॥ 30

वह वपां जातवेदः पितृभ्यो यत्रैनान्. वेत्थ निहितान् पराके ।
मेदसः कूल्या उप तान् क्षरन्तु सत्या एता आशिषः (एषामाशिषः)
सन्तु कामैः स्वाहा ॥ 31

यां जनाः प्रतिनन्दन्तीत्येषा ॥ 32

इयमेव सा या प्रथमा व्यौच्छदिति तिस्रः ॥ 33 तो 35 { }

**Expansion for – इयमेव सा या प्रथमा व्यौच्छदिति तिस्रः.**

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा ।
वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते ॥ 33

छन्दस्वती उषसा पेपिशाने समानं ँयोनिमनु सञ्चरन्ती ।
सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा ॥ 34

ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽगुः ।
प्रजामेका रक्षत्यूर्जमेका व्रतमेका रक्षति देवयूनां ॥ 35

(Ref - – TS 4.3.11.2)

एकाष्टकां पश्यत दोहमानामन्नं मा॒ꣳसवद्-घृतवथ्-स्वधावत् ।
तद्-ब्राह्मणैरतिपूत-मनन्त-मक्षय्य-ममुष्मिन् ँल्लोके स्फीतिं गच्छतु
मे पितृभ्यः स्वाहा ॥ 36

औलूखला ग्रावाणो घोषमक्रत हविः कृण्वन्तः परिवथ्सरीणम् ।
एकाष्टका सुप्रजा वीरवन्तो वयꣳ स्याम पतयो रयीणां ॥ 37
एकाष्टका तपसा तप्यमाना सम्ँवथ्सरस्य पत्नी दुदुहे प्रपीना ( ) ।
तं दोहमुपजीवाथ पितरः सहस्रधारममुष्मिन् ँल्लोके स्वाहा ॥ 38
*(आयतीं - प्रपीनैकं च ) (K20) (21)*

--------------------------------------------------------------------

## 2.21 अष्टकाद्यः

### 2.21.1 अष्टका

उक्थ्यश्चास्यतिरात्रश्च साद्यस्क्रीः छन्दसा सह ।
अपूपघृताहुते नमस्ते अस्तु मा॒ꣳसपिप्पले स्वाहा ॥ 1

भूः पृथिव्यग्निनर्चामुं मयि कामं नियुनज्मि स्वाहा ॥ 2

भुवो वायुनाऽन्तरिक्षेण साम्नाऽमुं मयि कामं नियुनज्मि स्वाहा ॥ 3

स्वर्दिवाऽऽदित्येन यजुषाऽमुं मयि कामं नियुनज्मि स्वाहा ॥ 4

जनदद्भि-रथर्वाङ्गिरोभि-रमुं मयि कामं नियुनज्मि स्वाहा ॥ 5

रोचनायाजिरायाग्नये देवजातवे स्वाहा ॥ 6

केतवे मनवे ब्रह्मणे देवजातवे स्वाहा ॥ 7

स्वधा स्वाहा 8, ऽग्नये कव्यवाहनाय स्वधा स्वाहा ॥ 9

### 2.21.2 सनिमित्वा जपः

अन्नमिव ते दृशे भूयासं 10,

ँवस्त्रमिव ते दृशे भूयासं 11,

ँवित्तमिव ते दृशे भूयास 12,

माशेव ते दृशे भूयास७ 13,

श्रद्धेव ते दृशे भूयास७ 14

स७स्रवन्तु दिशो महीः समाधावन्तु सूनृताः ( ) ॥ 15

सर्वे कामा अभियन्तु मा प्रिया अभिरक्षन्तु मा प्रियाः ।

यशोऽसि यशोऽहं त्वयि भूयासमसौ ॥ 16

**2.21.3 रथादिलाभे स्वीकारः**

अङ्कौ न्यङ्कावभित इत्येषा ॥ 17 { }

**Expansion for – अङ्कौ न्यङ्कावभित इत्येषा .**

अङ्कौ न्यङ्कावभितो रथं ँयौ ध्वान्तं ँवाताग्रमनु संचरन्तौ
दूरेहेति–रिन्द्रियावान् पतत्री ते नोऽग्नयः पप्रयः पारयन्तु ॥ 17

**(Ref - TS 1.7.7.2)**

अद्ध्वनामद्ध्वपते स्वस्ति मा सं पारय ॥ 18

अयं ँवामश्विनौ रथो मा दुःखे मा सुखे रिषत् ।
अरिष्टः स्वस्ति गच्छतु विविघ्नन् पृतनायतः ॥ 19

अश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि
वृषासि नृमणा असि ययुर्नामास्यादित्यानां पत्वाऽन्विहि ॥ 20

हस्तियशसमसि हस्तियशसी भूयासं ँवह कालवह श्रियं
माऽभिवह । इन्द्रस्य त्वा वज्रेणाभिनिदधाम्यसौ ॥ 21

**2.21.4 सँवादमेध्यतः कर्म**

अवजिह्वक निजिह्वकाव त्वा हविषा यजे ( ) ।
तथ् सत्यं ँयदहं ब्रवीम्यधरो मदसौ वदाथ् स्वाहा ॥ 22

आ ते वाचमास्यां दद आ मनस्या७् हृदयादधि ।
यत्र यत्र ते वाङ्गिनहिता तां त आददे ।
तथ् सत्यं ँयदहं ब्रवीम्यधरो मत्पद्यस्वासौ ॥ 23

*(सूनृता – हविषा यजे – चत्वारि च ) (K21) (24)*

--------------------------------------------------------------------------

## 2.22 विविधकर्माणि

**2.22.1. क्रोधापनयनार्थं कर्म**

या त एषा रराव्या तनूर्–मन्योर्–मृद्ध्रस्य नाशिनी ।
तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥ 1

यत् त एतन् मुखेऽमत७् रराटमुदिव विद्ध्यति ।
वि ते क्रोधन्नयामसि गर्भमश्वतर्या इव ॥ 2

**2.22.2. असम्भवेफ्सोः कर्म**

अवज्यामिव धन्वनो हृदो मन्युं तनोमि ते ।

इन्द्रापास्य पलिगमन्येभ्यः पुरुषेभ्योऽन्यत्र मत् ॥ 3

**2.22.3. पुण्यव्यवहारसिद्ध्यर्थं कर्म**

यदहं धनेन प्रपणꣳश्चरामि धनेन देवा धनमिच्छमानः ।

तस्मिन्थ् सोमो रुचमादधात्वग्निरिन्द्रो बृहस्पतिश्च स्वाहा ॥ 4

**2.22.4. स्नेहाविच्चेदार्थं कर्म**

परि त्वा गिरेरमिहं परि भ्रातुः परिष्वसुः ।

परि सर्वेभ्यो ज्ञातिभ्यः परि षीतः क्वेष्यसि ( ) ॥ 5

शश्वत् परिकुपितेन संक्रामेणाविच्छिदा ।

उलेन परिषीतोऽसि परिषीतोऽस्युलेन ॥ 6

**2.22.5 पलायितदासुदीनां पुनरागमनफलं कर्म.**

आवर्तन वर्तयेत्येषा ॥ 7 { }

**Expansion for - आवर्तन वर्तयेत्येषा .**

आवर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद ।

भूम्याश्चतस्रः प्रदिशस्ताभिरा वर्तया पुनः ॥ 7 (Ref -TS 3.3.10.1)

आवर्तने निवर्तन आवर्तन निवर्तनाय स्वाहा ॥ 8

अनुपोऽह्वदनुह्वयो निवर्तो वो न्यवीवृतत् ।
ऐन्द्रः परिक्रोशो वः परिक्रोशतु सर्वतः ॥ 9

यदि मामति मन्याद्ध्वा अदेवा देववत्तरम् ।
इन्द्रः पाशेन सिक्त्वा वो मह्यमिद्–वशमानयाथ् स्वाहा ॥ 10

**2.22.6 देहे फलदिपतने प्रक्षालनं.**

यदि वृक्षाद्–यद्यन्तरिक्षात्–फलमभ्यपतत्तदु वायुरेव ।
यत्रास्पृक्षत्तनुवं यत्र वास आपो बाधन्तां निर्.ऋतिं पराचैः ( ) ॥ 11

ये पक्षिणः पतयन्ति बिभ्यतो निर्.ऋतैः सह ।
ते मा शिवेन शग्मेन तेजसोन्दन्तु वर्चसा ॥ 12

दिवो नु मा बृहतो अन्तरिक्षादपा॰ स्तोको अभ्यपतच्छिवेन ।
समहमिन्द्रियेण मनसा समागां ब्रह्मणा संपृञ्चानः सुकृता कृतेन ॥ 13

**2.22.7 आगारस्थूणाविरोहणादीषु होमः.**

इमं मे वरुण14 { } , तत्त्वा यामि15 { }, त्वन्नो अग्ने 16 { },
स त्वन्नो अग्ने 17{ }, त्वमग्ने अयासि18 { } , प्रजापते 19 { } ।

**Expansion for – इमं मे वरुण14 , तत्त्वा यामि15 ,**
**त्वन्नो अग्ने 16 , स त्वन्नो अग्ने 17, त्वमग्ने अयासि18**
**(Same as Per EAK 2.15.1 )**

**Expansion for – प्रजापते 19.**

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वय॑ स्याम पतयो रयीणाम् ॥ 19

(Ref - TS 1.8.14.2)

सम्राजं च 20 { } व्याहृतीर् विहृताः ॥ (21–23) { }

**Expansion for – सम्राजं च , व्याहृतीर् विहृताः.**

सम्राजं च विराजं चाभिश्रीर्या च नो गृहे ।
लक्ष्मी राष्ट्रस्य या मुखे तया मा स॑सृजामसि ॥ 20

शुभिके शिर आ रोह शोभयन्ती मुखं मम ।
मुखꣳ हि मम शोभय भूयाꣳसं च भगं कुरु ॥ 21

यामाहरज्जमदग्निः श्रद्धायै कामायान्यै ।
इमां तामपि नह्येऽहं भगेन सह वर्चसा ॥ 22

यदाञ्जनं त्रैककुदं जातꣳ हिमवत उपरि ।
तेन वामाञ्जे तेजसे वर्चसे भगाय च ॥ 23 (Ref - EAK 2.8.1 & 2.)

2.22.8 अमात्यानामाभिमुख्येन निधने परिधिनिधानम्.

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्द्धमेतम् ।
शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ॥ 24
*(क्वेष्यसि – पराचै – रष्टौ च ) (K22) (28)*

======================

**Prapaataka Korvai with starting Padams of 1 to 22 Khandaas**

(उष्णेन पञ्चदशा – युर्दा एकवि॑ंशति – रागन्त्रा दश – योगेयोगे त्रयोदश – सुश्रवः सुश्नवसमष्टौ – परि त्वाऽग्न – इम॑ स्तोम – मायुष्य मेकान्नवि॑ंशति रेकान्नवि॑ंशतिर् – मयि पर्वतपूरुष॑ं षोडश – त्रय्यै विद्याया अष्टादश – धाता ददातु नो रयिमेकवि॑ंशति – रश्मा भव षोडश – मा ते कुमारं त्रयोवि॑ंशतिर् – नक्तञ्चारिणश्चतुर्दश – यद् भूमेः षोडवि॑ंशतिः – कूर्कुरः पञ्चवि॑ंशति – रिन्द्र जहि द्ववि॑ंशतिः – परमेष्ठ्यसि परमामष्टौ – यन्मे माता – पृथिवी ते पात्र मेकवि॑ंशति रेकवि॑ंशति – रुक्थ्यश्च त्रयोवि॑ंशतिर् – या त एषाऽष्टावि॑ंशतिर् द्ववि॑ंशतिः )

**Korvai with starting Padams of 1, 11, Series of Khandaas :-**

(उष्णेन – धातो – क्थ्यश्च द्ववि॑ंशतिः)

**First and Last Padam in EAK, 1st Prapaatakam :-**

(उष्णेन – पर्वतेन)

। हरिः ओम् ।

एकाग्निकाण्डे द्वीतीयः प्रपाठकः समाप्तः

-------- एकाग्निकाण्डः समाप्तः-------

## Ekaagni Kaandam Counts - 2nd Prapaatakam

| | Vaakyams |
|---|---|
| Khanda - 1 | 15 |
| Khanda 2 | 21 |
| Khanda 3 | 10 |
| Khanda 4 | 14 |
| Khanda 5 | 8 |
| Khanda 6 | 19 |
| Khanda 7 | 19 |
| Khanda 8 | 19 |
| Khanda 9 | 16 |
| Khanda 10 | 18 |
| Khanda 11 | 11 |
| Khanda 12 | 16 |
| Khanda 13 | 23 |
| Khanda 14 | 14 |
| Khanda 15 | 26 |
| Khanda 16 | 25 |
| Khanda 17 | 22 |
| Khanda 18 | 8 |
| Khanda 19 | 21 |
| Khanda 20 | 21 |
| Khanda 21 | 24 |
| Khanda 22 | 28 |
| Total → | 398 |

**Note: The difference actual counts**

**For Khanda 4 :- 13 vaakyams are shown in korvai, but in actual count it is 14.**

**For Khanda 13:- 23 vaakyams are shown in korvai, but in actual count it is 24.**